CC-0. In Public Domain. Digitization by eGangotri

FJAB-02

फलितज्योतिषम्

आचार्यसेतुः, द्वितीयपत्रम्

मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

मुहूर्त्तचिन्तामणिः

(नक्षत्रप्रकरणम्)

खण्डः

२

विविधव्यापारसम्बद्धाः मुहूर्ताः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

FJAB-02

मुहूर्त्तचिन्तामणिः
(नक्षत्रप्रकरणम्)

फलितज्योतिषाचार्यसेतुः,
द्वितीयपत्रम्

खण्डः

२

विविधव्यापारसम्बद्धाः मुहूर्त्ताः

चतुर्थः पाठः ०५-१४

पञ्चमः पाठः १५-३३

षष्ठः पाठः ३४-५२

सप्तमः पाठः ५३-७०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानसम्पादकः

कुलसचिवः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठलेखनम्

डॉ. अनिलप्रतिहस्त	डॉ. रतनकुमारपाण्डेयः	श्री मुकेशकुमारः	श्रीमुरलीश्यामः
प्रवक्ता	अंशकालिकः सहायकाचार्यः	अतिथिः प्राध्यापकः	शोधच्छात्रः
दिल्लीशासनम्,	राष्ट्रियसंस्कृतसंस्थानम्	मुक्तस्वाध्यायपीठम्	राष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली	रणवीरपरिसरः, जम्मू	राष्ट्रियसंस्कृतसंस्थानम्	तिरुपतिः
(४ पाठः)	(५ पाठः)	(६ पाठः)	(७ पाठः)

सम्पादनम्

डा. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठ्यक्रमसंयोजनम्

डॉ. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनम्

डा. रमाकान्तपाण्डेयः
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१४, पुनर्मुद्रणम् : २०१४, २०१५

ISBN : 978-93-82091-49-3

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसामग्र्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।

प्रयुक्तकागदम् – Agro-based environment Friendly.

पृष्ठविन्यासः

राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

संजयकुमारशर्मा
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खण्डपरिचयः

भो छात्र! आचार्यसेतुपाठ्यक्रमस्य द्वितीयपत्रे 'नक्षत्रप्रकरणम्' इत्याख्ये द्वितीयखण्डे भवतः स्वागतम्। अयं द्वितीयः खण्डः "विविधव्यापारसम्बन्धिमुहूर्त्ताः" इति नामधेयः। खण्डेऽस्मिन् चत्वारः पाठाः सन्ति –

1. चतुर्थः पाठः – प्रवालादिधारणमुहूर्त्ताः

2. पञ्चमः पाठः – क्रय-विक्रयभूषाघटनादिमुहूर्त्ताः

3. षष्ठः पाठः – खड्गादिधारण-शय्योपभोग-जलाशयखननादिमुहूर्त्ताः

4. सप्तमः पाठः – कृषिकर्मसम्बन्धिमुहूर्त्ताः

चतुर्थे पाठे भवान् वस्त्रप्रकारान् ज्ञात्वा वस्त्रधारणस्य शुभकालञ्च ज्ञास्यति। एतदितिरिच्य लतापादपारोपण-राजदर्शन-मद्यनिर्माण-गोक्रय-विक्रयमुहूर्त्तान् अपि पठिष्यति।

पञ्चमे पाठे क्रय-विक्रयमुहूत्तर्योः विशेषेण अध्ययनं करिष्यति। क्रय-विक्रयनक्षत्रयोः परस्परनिषेधः, कदा क्रयः कदा च विक्रयः कार्यः इति स्पष्टतया वर्ण्यते। तदनु अश्व-हस्त्यादीनां क्रय-विक्रयमुहूर्त्तान् ततः भूषाघटना-मुद्रापातनादिमुहूर्त्तानपि पाठेऽस्मिन् भवान् पठिष्यति।

षष्ठे पाठे नूतनशस्त्राणां शय्यादीनाञ्च उपभोगाय शुभाशुभकालः व्याख्यायितः। ततः अन्धाक्षादिनक्षत्राणां स्वरूपं जलशयादिखननमुहूर्त्तञ्च ज्ञास्यति।

अन्तिमे सप्तमे पाठे कृषिकर्मणि क्रियमाणव्यापाराणां मुहूर्त्तविवेचना क्रियते। तत्र हलप्रवहणस्य बीजवपनस्य शिरोमोक्षणादीनाञ्च शुभाशुभकालः विस्तरेण प्रतिपादितः।

इत्थम् अस्य खण्डस्य अध्ययनेन विविधानां भूषाघटन-मुद्रापातन-क्रयविक्रयण-कृषिकर्मप्रभृतीनां व्यापाराणां कर्मणां वा सफल्याय शुभाशुभकालं मुहूर्त्तं वा नूनमेव ज्ञास्यति।

—•—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थः पाठः - प्रवालादिधारणमुहूर्त्ताः

पाठसंरचना

4.1 प्रस्तावना
4.2 उद्देश्यम्
4.3 प्रवालादिधारणमुहूर्त्तः
बोधप्रश्नाः
4.4 दग्ध-स्फुटित-पङ्कादिलिप्तनूतनवस्त्रस्य शुभाशुभत्वम्
4.5 स्पष्टार्थं वस्त्रस्य नवभागचक्रम्
बोधप्रश्नाः
4.6 दुर्योगे अपि वस्त्रधारणे विशेषः
बोधप्रश्नाः
4.7 लतापादपारोपण-राजदर्शन-मद्यनिर्माण-गोक्रयविक्रयमुहूर्त्ताः
बोधप्रश्नाः
4.8 औषधग्रहणमुहूर्त्तः
बोधप्रश्नाः
4.9 सारांशः
4.10 मूलपाठः
4.11 शब्दावली
4.12 सन्दर्भग्रन्थः
4.13 सहायकग्रन्थः
4.14 बोधप्रश्नोत्तराणि
4.15 अभ्यासप्रश्नाः

४.१ प्रस्तावना

प्रियमित्रम्! तृतीयपत्रस्य अस्मिन् द्वितीयखण्डे भवतः स्वागतम्। 'नक्षत्रपरिचयः' इत्याख्ये प्रथमखण्डे भवान् नक्षत्रसम्बन्धिनः नक्षत्रस्य खगोलीयस्वरूप-नक्षत्रसंख्या-नक्षत्रनाम-अभिजिन्नक्षत्रस्वरूप-नक्षत्रदेवता-नक्षत्रतारासंख्या-नक्षत्राकृति-ध्रुवादिसंज्ञा- अधोमुखादिसंज्ञाविषयान् सम्यग्रूपेण पठितवान्। केषाञ्चन मुहूर्त्तानां विषये भवान् पाठेऽस्मिन्। अस्मिन् चतुर्थे पाठे प्रप्रथमं प्रवाल-हस्तिदन्त-शङ्ख-स्वर्ण-वस्त्रधारणमुहूर्त्तः, ततः नूतनवस्त्रस्य दग्धे स्फुटिते पङ्कादिलिप्ते सति शुभाशुभत्वनिर्णयः, ततः निषिद्धे अपि योगे नूतनवस्त्रधारणस्थितिः, ततः लतापादपारोपण-राजदर्शन-मद्यनिर्माण-गोक्रयविक्रयमुहूर्त्तः, अन्ते च औषधग्रहणमुहूर्त्तः इत्यादीन् विषयान् विविच्य मुहूर्त्तस्य नक्षत्रप्रधानत्वं सन्दर्शितं वर्तते।

४.२ उद्देश्यम्

- अस्य पाठस्य अध्ययनेन भवान् मुहूर्तस्य प्रमुखानाम् अङ्गानां नक्षत्र-तिथि-वारलग्नादीनां सम्बन्धं वक्तुं प्रभविष्यति।
- प्रवालादिवस्तूनां धारणस्य मुहूर्तं ज्ञात्वा स्वयमपि उचितसमयेन तानि वस्तूनि धारयितुम् अन्यानपि बोधयितुं शक्नोति।
- नूतनवस्त्रस्य दग्धादिस्थितिवशात् उपयोज्यम् अनुपयोज्यं विचारयितुं शक्नोति।
- निषिद्धयोगेऽपि वस्त्रधारणस्य परिहारज्ञानेन भवान् निषिद्धकालेऽपि परिहारपूर्वकं नूतनवस्त्रधारयितुं निर्देष्टुं च शक्नोति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

- लतापादपादिरोपणस्य नृप-अधिकारिणां दर्शनस्य मेलनस्य वा मद्यादिपदार्थानाम् उचितसेवनस्य पशुक्रयविक्रययोः समुचितकालं च बोधयितुं शक्नोति।
- औषधग्रहणमुहूर्तस्य ज्ञानेन समुचितकालं विज्ञाय शीघ्रातिशीघ्रं स्वस्थः भवितुमर्हति।

४.३ प्रवालादिधारणमुहूर्तः

अस्मिन् बिन्दौ प्रवाल (मूंगा-पन्नादयः) हस्तिदन्त-शङ्ख-स्वर्ण-वस्त्रधारणमुहूर्तः प्रदर्शितः विद्यते। एतदर्थं मुहूर्तचिन्तामणिग्रन्थे उल्लिखितं वर्तते -

"पौष्णध्रुवाश्विकरपञ्चकवासवेज्या-
दित्ये प्रवालरदशङ्खसुवर्णवस्त्रम्।
धार्यं विरिक्तशनिचन्द्रकुजेऽह्नि रक्तं
भौमे ध्रुवादितियुगे सुभगा न दध्यात्॥"

पदच्छेदः - पौष्ण ध्रुव अश्वि करपञ्चक वासव इज्य आदित्ये प्रवाल रद शङ्ख सुवर्ण वस्त्रम् धार्यं विरिक्त शनिचन्द्रकुजे अह्नि रक्तं भौमे ध्रुव अदितियुगे सुभगा न दध्यात्।

अन्वयः - पौष्णध्रुवाश्विकरपञ्चकवासवेज्यादित्ये (नक्षत्रे) विरिक्तशनिचन्द्रकुजे अह्नि प्रवाल-रद-शङ्ख-सुवर्ण-वस्त्रं धार्यम्। भौमे रक्तं वस्त्रं (धार्यम्)। ध्रुवादितियुगे (नक्षत्रे) सुभगा (एतत् सर्वम्) न दध्यात्।

प्रतिपदार्थः - पौष्णध्रुवाश्विकरपञ्चकवासवेज्यादित्ये = पौष्णं रेवती, ध्रुवाणि ध्रुवसंज्ञक-नक्षत्राणि (उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-रोहिण्यः) अश्वि अश्विनी, करपञ्चकं हस्तपञ्चकम् अर्थात् हस्तनक्षत्रात् आरभ्य पञ्चनक्षत्राणाम् (हस्त-चित्रा-स्वाती-विशाखा-पुनर्वसुः एतेषु नक्षत्रेषु, विरिक्तशनिचन्द्रकुजे = विरिक्ताः तिथिषु रिक्तातिथीन् (चतुर्थी-नवमी-चतुद्रश्यः) विहाय शेषतिथिषु, वि-शनिचन्द्रकुजे वासरेषु शनि-चन्द्र-मंगलवासरान् त्यक्त्वा अर्थात् रवि-बुध-गुरु-शुक्रवासरेषु, अह्नि = दिवसे, प्रवालरदशङ्खसुवर्णवस्त्रम् = प्रवालं विद्रुमम् (मूंगा-पन्नादयः रत्नानि), रदाः हस्तिदन्ताः तन्निर्मिताभूषणानि च, शङ्खः शङ्खयुक्ताभूषणम्, सुवर्णं स्वर्णम् तन्निर्मिताभरणानि च, वस्त्रं नूतनवस्त्राणि च, धार्यम् = एतानि वस्तूनि आभरणानि वस्त्राणि च धारणीयानि, भौमे = मङ्गलवासरे, रक्तं (वस्त्रम्) = रक्तवर्णात्मकं नूतनवस्त्रधारणं शुभं भवति, ध्रुवादितियुगे = ध्रुवसंज्ञकनक्षत्राणि (उत्तराफाल्गुनी-उत्तराषाढ-उत्तभाद्रपद-रोहिण्यः) अदितियुगं पुनर्वसुद्वये अर्थात् पुनर्वसुपुष्ये च - एतेषु नक्षत्रेषु, सुभगा = सौभाग्यशालिन्यः स्त्रियः, न दध्यात् = उपर्युक्तानि प्रवाल-दन्त-आभरण-वस्त्रादिवस्तूनि न धारयेयुः इति।

सरलार्थः - उपर्युक्ते पद्ये मूंगापन्नादिरत्न-हस्तिदन्त-शङ्ख-स्वर्ण-नूतनवस्त्राणां प्रथमवारं धारणस्य मुहूर्तः निगदितः वर्तते। अस्मिन् मुहूर्ते उपयोज्यनक्षत्र-वार-तिथयः वर्णिताः सन्ति। नक्षत्रेषु रेवती-ध्रुवसंज्ञक (उत्तरफाल्गुनी-उत्तराषाढ-उत्तराभाद्रपद्-रोहिण्यः)-अश्विनी-हस्तनक्षत्रात् आरभ्य पञ्चनक्षत्राणि (हस्त-चित्रा-स्वाती-विशाखा-अनुराधाः)-धनिष्ठा-पुष्य-पुनर्वसु-इत्येतानि नक्षत्राणि वासरेषु शनैश्चर चंद्रवासर-मंगलवासरान् विहाय रवि-बुध-गुरु-शुक्रवासरेषु, तिथिषु च रिक्तातिथीन् (चतुर्थी-नवमी-चतुद्रशी) विहाय शेषतिथयः प्रवालादिधारणे प्रयोज्यन्ते। मंगलवासरे रक्तवस्त्रस्य धारणं शुभं भवति। सौभाग्यशालिन्यः स्त्रियः उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-रोहिणी-पुनर्वसु-पुष्यनक्षत्रेषु-प्रवालादिवस्तूनि न धारयेयुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बोधप्रश्नाः

१. उपर्युक्तपद्ये केषां धारणस्य मुहूर्तः उल्लिखितः वर्तते?

२. रत्नधारणे कानि शुभनक्षत्राणि कथितानि सन्ति?

३. रत्नादिधारणे के वासराः त्याज्याः भवन्ति?

४. निम्नलिखितासु काः तिथयः रत्नादिधारणे त्यज्यन्ते –

(अ) १, ६, ११ (ब) २, ७, १२

(स) ३, ८, १३ (द) ४, ९, १४

४.४ दग्ध-स्फुटित-पङ्कादिलिप्तनूतनवस्त्रस्य शुभाशुभत्वम्

पाठकः! अत्र नूतनवस्त्रस्य उपयोगात् पूर्वं कुत्रचित् दग्धे स्फुटिते पङ्कादिलिप्ते वा सति तस्य वस्त्रस्य शुभाशुभत्वं प्रदर्शितं वर्तते –

"वस्त्राणां नवभागकेषु च चतुष्कोणेऽमरा राक्षसा,
मध्यत्र्यंशगता नरास्तु सदशे पाशे च मध्यांशयोः।
दग्धे वास्फुटितेऽम्बरे नवतरे पङ्कादिलिप्ते न स-
द्रक्षोंऽशे नृसुरांशयोः शुभमसत्सर्वांशके प्रान्ततः॥"

पदच्छेदः – वस्त्राणां नवभागकेषु च चतुष्कोणे अमराः राक्षसाः मध्यत्र्यंशगताः नराः तु सदशे पाशे च मध्यांशयोः दग्धे वा स्फुटिते अम्बरे नवतरे पङ्कादिलिप्ते न सत् रक्षः अंशे नृसुरांशयोः शुभम् असत् सर्वांशके प्रान्ततः।

अन्वयः – वस्त्राणां नवभागकेषु च चतुष्कोणे अमराः (स्थाप्याः) राक्षसाः मध्यत्र्यंशगताः, नराः तु सदशे पाशे मध्यांशयोः (स्थापनीयाः)। (अथ) नवतरे अम्बरे रक्षोंऽशे दग्धे स्फुटिते वा पङ्कादिलिप्ते वा (सति) सत् न (भवति)। नृसुरांशयोः शुभं (ज्ञेयम्), प्रान्ततः सर्वांशके असत् (भवति)।

प्रतिपदार्थः – वस्त्राणां = वस्त्र-शय्या-आसनादिवस्त्राणाम्, नवभागकेषु = नवसंख्यात्मकखण्डान् कृत्वा तेषु नवखण्डेषु, च, चतुष्कोणे = वस्त्रासनानां चतुर्षु कोणेषु, अमराः = देवताः (स्थाप्याः), राक्षसाः = दानवसंज्ञकाः, मध्यत्र्यंशगताः = नवभागेषु ऊर्ध्वाधररूपेण मध्यस्थत्रिभागेषु (स्थापनीयाः), नराः = मनुष्यसंज्ञाः, तु, सदशे पाशे = नवभागेषु अवशिष्टयोः उभयोः पार्श्वस्थबन्धनभागयोः, मध्यांशयोः = उभयोः पार्श्वयोः मध्यभागयोः अर्थात् नवभागेषु उभयपार्श्वस्थावशिष्टस्थानद्वये (नराः स्थाप्याः), नवतरे = नूतने, अम्बरे = वस्त्रे, रक्षोंऽशे = राक्षसानां भागे स्थाने वा, दग्धे = प्रज्वलिते, स्फुटिते वा = विदीर्णे वा, पङ्कादिलिप्ते वा = पङ्केन कद्रमेन आदिशब्दात् गोमयादिभिर्लिप्ते उपहते वा (सति), सत् न = तत् वस्त्रं शुभफलजनकं न भवति, नृसुरांशयोः = मनुष्यदेवयोः कस्मिन् अपि भागे दग्धे स्फुटिते पङ्कादिलिप्ते वा सति, शुभं = शुभफलजनकम्, प्रान्ततः = नूतनवस्त्रस्य बाह्यभागे, सर्वांशके = देव-राक्षस-मनुष्याणां कस्मिन् अपि भागे दग्धे, स्फुटिते पङ्कादिलिप्ते वा, असत् = अशुभफलजनकं भवति।

सरलार्थः – अस्मिन् पद्ये एतत् वर्णितं विद्यते यत् यदा नूतनं वस्त्रम् आसनं शय्यादिकं वा प्रयुज्यते तत्काले यदि तत् वस्त्रं कुत्रचित् प्रज्वलितं विदीर्णं गोमयादिलिप्तं वा भवेत्, तदा तत् वस्त्रं कीदृशं फलदायकं भवतीति। उक्तवस्त्रस्य शुभाशुभत्वज्ञानाय प्रथमं समग्रस्य वस्त्रस्य नवसंख्यात्मकाः भागाः कर्तव्याः। तेषु नवभागेषु अन्यतमेषु चतुर्षु कोणेषु

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देवता: स्थाप्या:। तत: ऊर्ध्वाधररूपेण मध्यस्थेषु त्रिषु स्थानेषु राक्षसा: स्थापनीया:। अवशिष्टयो: द्वयो: स्थानयो: नरौ लेखनीयौ। अत: परं वस्त्रस्य दग्ध-स्फुटित-पङ्कादिलिप्तभाग: द्रष्टव्य: यत् स: भाग: देव-राक्षस-मनुष्याणां नवभागेषु कस्मिन् भागे आगच्छति? यदि दग्धादिवस्त्रभाग: राक्षसानां स्थानेषु समायाति, तदा तत् वस्त्रम् अशुभफलदायकं भवति। अत: तस्य वस्त्रस्य उपयोग: न कर्तव्य:। यदि दग्धादिवस्त्रभाग: नरस्य देवस्य वा भागे भवति तदा तत् वस्त्रं शुभप्रदायकं भवति। यदि तत् वस्त्रं सर्वत: प्रान्तभागेषु दग्ध-स्फुटित-पङ्कादिलिप्तं वा भवेत् तदा तत् न उपयोज्यम् अर्थात् सर्वथा त्याज्यं भवति।

विशेष: - नूतनवस्त्रस्य देव-राक्षस-मनुष्याणां विभाजने ध्यातव्यं यत् वस्त्राणि प्राय: आयताकारे भवन्ति। यत: वस्त्रस्य विस्तृति: अधिका भवति, तत: एव ऊर्ध्वाधररूपेण विभागा: कर्तव्या:। यदि वस्त्रं वर्गाकारं भवेत् तदा यस्मात् भागात् बन्धनं प्रारभ्यते, तस्य पार्श्वभागात् ऊर्ध्वाधररूपेण वर्गीकरणं कुर्यादिति।

४.५ स्पष्टार्थं वस्त्रस्य नवभागचक्रम्

देवांश: शुभम्	राक्षसांश: अशुभम्	देवांश: शुभम्
नरांश: शुभम्	राक्षसांश: अशुभम्	नरांश: शुभम्
देवांश: शुभम्	राक्षसांश: अशुभम्	देवांश: शुभम्

बोधप्रश्ना:

५. नूतनवस्त्रस्य शुभाशुभत्वज्ञानं कदा क्रियते -

(अ) दग्धे सति (ब) स्फुटिते सति

(स) पङ्कादिलिप्ते सति (द) उपर्युक्तासु सर्वासु स्थितिषु

६. नूतनवस्त्रस्य शुभाशुभत्वज्ञानाय कति भागा: क्रियन्ते?

(अ) पञ्च (ब) सप्त

(स) नव (द) एकादश

७. वस्त्रस्य केषु भागेषु देवता: स्थाप्या: ?

(अ) चतुष्कोणेषु (ब) ऊर्ध्वाधररूपेण मध्यस्थत्रिभागेषु

(स) तिर्यग्रूपेण मध्यस्थत्रिभागेषु (द) प्रान्तभागेषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८. सम्यक् मेलनं करोतु -

(अ)	देवांशे	अशुभम्
(ब)	राक्षसांशे	शुभम्
(स)	मानवांशे	शुभम्

४.६ दुर्योगे अपि वस्त्रधारणे विशेषः

मित्र! नूतनवस्त्राणाम् उपयोगात् पूर्वम् उपर्युक्तप्रकारेण शुभाशुभयोः विचारः क्रियते किन्तु केषुचित् विशेषपरिस्थितिषु शुभाशुभत्वविचारः नैव क्रियते। यथा -

"विप्राज्ञया तथोद्वाहे राज्ञा प्रीत्यार्पितं च यत्।
निन्द्येऽपि धिष्ण्ये वारादौ वस्त्रं धार्यं जगुर्बुधाः॥"

पदच्छेदः - विप्र+आज्ञया तथा उद्वाहे राज्ञा प्रीत्या अर्पितं च यत् निन्द्ये अपि धिष्ण्ये वारादौ वस्त्रं धार्यं जगुः बुधाः।

अन्वयः - धिष्ण्ये वारादौ निन्द्ये अपि विप्राज्ञया उद्वाहे तथा राज्ञा प्रीत्या अर्पितं च यत् वस्त्रं (तत्) धार्यं (इति) बुधाः जगुः।

प्रतिपदार्थः - धिष्ण्ये = नक्षत्रे, वारादौ = वार-तिथि-योग-भद्रादौ (दुष्टयोगेषु) निन्द्ये अपि = वर्जिते अपि, विप्राज्ञया = ब्राह्मणस्य अनुज्ञया, उद्वाहे = विवाहे, तथा राज्ञा = नृपेण च, प्रीत्या = प्रेम्णा प्रसन्नतायाः? भावेन, यत् वस्त्रम् = यादृशं चीरम्, धार्यम् = धारणीयम् (इति) बुधाः = विद्वांसः, जगुः = कथितवन्तः।

सरलार्थः - नूतनवस्त्राणां धारणे शुभवार-नक्षत्र-तिथि-योगादिनां विचारः आवश्यकः भवति किन्तु केषुचित् विशिष्टपरिस्थितिषु नूतनवस्त्रधारणे उपर्युक्तवारादीनां विचारः आवश्यकः न भवति, यथा - ब्राह्मणस्य आज्ञया, विवाहावसरे प्राप्तानि धारणीयानि वस्त्राणि, प्रसन्नभावेन नृपेन दत्तानि वस्त्राणि आदि।

बोधप्रश्नाः

९. 'विप्राज्ञया' पदस्य तात्पर्यं किम् ?

(अ)	क्षत्रियस्य आज्ञया	(ब)	ब्राह्मणस्य आज्ञया
(स)	वैश्यस्य आज्ञया	(द)	नृपाज्ञया

१०. 'उद्वाह' पदस्य कोऽर्थः ?

(अ)	वहनम्	(ब)	विवाहः
(स)	उत्कर्षः	(द)	वस्त्रम्

११. निन्द्ये धिष्ण्ये वारादौ अपि कदा वस्त्राणि धारणीयानि ?

४.७ लतापादपारोपण-राजदर्शन-मद्यनिर्माण-गोक्रयविक्रयमुहूर्ताः

"राधामूलमृदुध्रुवर्क्षवरुणक्षिप्रैर्लतापादपा-
रोपोऽथो नृपदर्शनं ध्रुवमृदुक्षिप्रश्रवो वासवैः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तीक्ष्णोग्राम्बुपभेषु मद्यमुदितं क्षिप्रान्त्यवद्ह्नीन्दुभा-
दित्येन्द्राम्बुपवासवेषु हि गवां शस्तः क्रयो विक्रयः॥''

पदच्छेदः - राधा-मूल-मृदु-ध्रुव-ऋक्ष-वरुण-क्षिप्रैः लता पादप+आरोपः अथ नृपदर्शनम् ध्रुव मृदु क्षिप्रश्रवः वासवैः तीक्ष्ण उग्र अम्बुपभेषु मद्यम् उदितम् क्षिप्र अन्त्य वह्नि इन्दुभ-आदित्य-इन्द्र-अम्बुपवासवेषु हि गवाम् शस्तः क्रयः विक्रयः।

अन्वयः - राधामूलमृदुध्रुवर्क्षवरुणक्षिप्रैः (नक्षत्रैः) लतापादपारोपः (शुभः स्यात्)। अथ ध्रुवमृदुक्षिप्रश्रवोवासवैः (नक्षत्रैः) नृपदर्शनं (शुभं स्यात्)। तीक्ष्णोग्राम्बुपभेषु मद्यम् (शुभम्) उदितम्। क्षिप्रान्त्यवह्नीन्द्रभादित्येन्द्राम्बुपवासवेषु (नक्षत्रेषु) गवां क्रयः विक्रयः हि शस्तः (स्यात्)।

प्रतिपदार्थः - राधामूलमृदध्रुवर्क्षवरुणक्षिप्रैः = राधा विशाखा, मूल मूलम्, मृदु मृदुसंज्ञकचित्त-अनुराधा-मृगशिरा-रेवत्यः, ध्रुवं ध्रुवसंज्ञकरोहिणी-उत्तरातिस्रः (उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपदेति) वरुणं शतभिषा, क्षिपं क्षिप्रसंज्ञकहस्त-अश्विनी-पुष्य-अभिजितः-एतैः नक्षत्रैः, लतापादपारोपः = लतापादपानां वृक्षाणाम्, आरोपः = वपनम् (शुभं स्यात्), अथ = अनन्तरम्, ध्रुवमृदुक्षिप्रश्रवोवासवैः = ध्रुवं ध्रुवसंज्ञकरोहिणी-उत्तरातिस्रः (उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपदेति), मृदु मृदुसंज्ञकचित्रा-अनुराधा-मृगशिरा-रेवत्यः, क्षिपं क्षिप्रसंज्ञकहस्त-अश्विनी-पुष्य-अभिजितः, श्रवो श्रवणम्, वासवं धनिष्ठा-इत्येतैः नक्षत्रैः, नृपदर्शनम् = राज्ञः दर्शनं शुभं स्यात्, तीक्ष्णोग्राम्बुपभेषु = तीक्ष्णं तीक्ष्णसंज्ञकमूल-ज्येष्ठा-आर्द्रा-आश्लेषाः, उग्रं उग्रसंज्ञक-भरणी-मघा-पूर्वातिस्रः (पूर्वफाल्गुनी-पूर्वाषाढ-पूर्वभाद्रपदेति), अम्बुपं शतभिषा, भेषु = उक्तनक्षत्रेषु, मद्यं = मद्यनिर्माणं शुभम्, उदितम् = कथितम्, क्षिप्रान्त्यवह्नीन्द्रभादि-त्येन्द्राम्बुपवासवेषु = क्षिपं क्षिप्रसंज्ञकहस्त-अश्विनी-पुष्य-अभिजितः, अन्त्यं रेवती, वह्नीन्द्रभं विशाखा, आदित्यः पुनर्वसुः, इन्द्रः ज्येष्ठा, अम्बुपः शतभिषा, वासवं धनिष्ठा-इत्येतेषु नक्षत्रेषु, गवां = धेनूनाम्, क्रयः = क्रयकरणम्, विक्रयः = विक्रयकरणम्, हि = निश्चयेन, शस्तः = शुभः स्यात्।

सरलार्थः - अत्र वृक्षारोपणार्थं विशाखा-मूल-चित्रा-अनुराधा-मृगशिरा-रेवती-रोहिणी-उत्तरफाल्गुनी- उत्तराषाढ-उत्तरभाद्रपद-शतभिषा-हस्त-अश्विनी-पुष्य-अभिजिन्नक्षत्राणि उपयुक्तानि कथितानि सन्ति। तथैव राज्ञः दर्शनार्थं रोहिणी-उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-चित्रा-अनुराधा-मृगशिरस्-रेवती-हस्त-अश्विनी-पुष्य-अभिजित्-श्रवण-धनिष्ठा इत्येतानि शुभप्रदानि सन्ति। मद्यनिर्माणार्थं मूल-ज्येष्ठा-आर्द्रा-आश्लेषा-भरणी-मघा-पूर्वफाल्गुनी-पूर्वाषाढ-पूर्वभाद्रपद-शतभिषानक्षत्राणि लाभप्रदानि भवन्ति। एवमवे गवादिपशूनां क्रय-विक्रयार्थं हस्त-अश्विनी-पुष्य- अभिजित्-रेवती-विशाखा-पुनर्वसु-ज्येष्ठा-शतभिषा-धनिष्ठानक्षत्राणि लाभप्रदानि सन्ति।

विशेषः - प्राचीनकाले नृपदर्शनम् अत्यन्तं महत्वपूर्णम् आसीत्। यतोहि नृपस्य सम्मुखे गमनेन जनेभ्यः विभिन्नलाभाः भवन्ति स्म। यथा - चलाचलसम्पत्तिलाभः, विवादेषु न्यायः, प्रतिभासम्मानमित्यादयः। अतः नृपदर्शनस्य शुभकालः अपेक्ष्यते स्म। किन्तु वर्तमाने नृपदर्शनस्य नक्षत्राणि जनानाम् उच्चाधिकारिभिः सह मेलने कर्तुं शक्यते, यैः अस्माकं कार्याणि संसाधयितुं शक्यन्ते।

बोधप्रश्नाः

१२. वृक्षारोपार्थं कानि नक्षत्राणि शस्तानि वर्तन्ते ?

१३. नृपदर्शनार्थं कानि नक्षत्राणि शस्तानि सन्ति ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४. मद्यनिर्माणार्थं कानि नक्षत्राणि विहितानि सन्ति ?

१५. गवादिपशूनां क्रयविक्रयार्थं कानि नक्षत्राणि उपयुक्तानि सन्ति ?

४.८ औषधग्रहणमुहूर्तः

''भैषज्यं सल्लघुमृदुचरे मूलभे द्वयङ्गलग्ने,
शुक्रेन्द्विज्ये विदि च दिवसे चापि तेषां रवेश्च।
शुद्धे रिष्फद्युनमृतिगृहे सत्तिथौ नो जनेर्भे।''

पदच्छेदः - भैषज्यं सत् लघु मृदु चरे मूलभे द्वि+अङ्गलग्ने शुक्र+इन्दु+इज्ये विदि च दिवसे च+अपि तेषां रवेः च शुद्धे रिष्फ द्युनमृतिगृहे सत् तिथौ नो जनेः भे।

अन्वयः - लघुमृदुचरे मूलभे, द्वयङ्गलग्ने, शुक्रेन्द्विज्ये विदि च (द्वयङ्गलग्ने) तेषां रवेश्च दिवसे चापि, रिष्फद्युनमृतिगृहे शुद्धे सत्तिथौ भैषज्यं सत् स्यात्। जनेः भे (भैषज्यं सत्) नो।

प्रतिपदार्थः - लघुमृदुचरे = लघु लघुसंज्ञकहस्त-अश्विनी-पुष्य-अभिजितः, मृदु मृदुसंज्ञकमृगशिरस्-रेवती-चित्रा-अनुराधाः, चरं चरसंज्ञकस्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषाः इत्येतानि द्वादशनक्षत्राणि, मूलभे = मूलनक्षत्रे च, द्वयङ्गलग्ने = द्विस्वभावलग्नेषु (मिथुन-कन्या-धनु-मीनेषु), शुक्रेन्द्विज्ये = शुक्र-सोम-गुरुवासरेषु, विदि च = बुधवासरे च, तेषाम् = उपर्युक्तनक्षत्रलग्नानाम्, रवेश्च = रविवासरस्य च, दिवसे चापि = दिने चापि, रिष्फद्यूनमृतिगृहे = लग्नात् द्वादश-सप्तम-अष्टमस्थानेषु, शुद्धे = ग्रहाभावे, सत्तिथौ = शुभतिथिषु, भैषज्यम् = औषधग्रहणम्, सत् = शुभकरम्, स्यात् = भवेत्, जनेः = जन्मनः, भे = नक्षत्रे (औषधग्रहणम्) नो = शुभकरं न भवति।

सरलार्थः -

अस्मिन् पद्ये औषधग्रहणार्थम् उपयुक्तनक्षत्र-लग्न-वाराः निद्रिष्टाः सन्ति। नक्षत्रेषु हस्त-अश्विनी-पुष्य-अभिजित्-मृगशिरस्-रेवती-चित्रा-अनुराधा-स्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषा-मूलनक्षत्राणि शस्तानि सन्ति। द्वादशराशीनां लग्नेषु द्विस्वभावलग्नानि अर्थात् मिथुन-कन्या-धनु-मीनलग्नानि शस्तानि सन्ति। रव्यादिवासरेषु रवि-चंद्र-बुध-गुरु-शुक्रवासराः शुभदाः भवन्ति। द्विस्वभावलग्नानि अतिरिच्य अन्यानि लग्नानि अपि गृह्यन्ते, यदि लग्नात् सप्तम-अष्टम-द्वादशस्थानेषु ग्रहशुद्धिः भवेत् अर्थात् शुभाशुभग्रहाभावो भवेत्। जन्मनक्षत्रे अपि औषधग्रहणं न कर्तव्यम्।

विशेषः - प्रथमवारम् औषधग्रहणे एव उपर्युक्तविचारः क्रियते।

बोधप्रश्नाः

१६. औषधग्रहणार्थं शुभनक्षत्राणि कानि कथितानि सन्ति ?

१७. औषधग्रहणार्थं कानि लग्नानि शस्तानि सन्ति ?

१८. औषधग्रहणार्थं शुभवासराः के सन्ति ?

१९. औषधग्रहणार्थं मुहूर्तविचारः कदा क्रियते ?

(अ) प्रथमवारम् (ब) द्वितीयवारम्

(स) तृतीयवारम् (द) सर्वदा

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४.९ सारांशः

मित्र ! इमं पाठं संक्षेपेण पठनार्थं निम्नबिन्दवः प्रस्तूयन्ते -

(१) प्रवालादिधारणमुहूर्तः -

अस्मिन् प्रवालादिधारणमुहूर्ते प्रवाल-हस्तिदन्त-शङ्ख-सुवर्ण-वस्त्रधारणमुहूर्ताः सम्मिलितरूपेण विवेचिताः सन्ति। एतानि वस्तूनि धारणार्थम् उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-रोहिणी-अश्विनी-हस्त-चित्रा-स्वाती-विशाखा-अनुराधा-धनिष्ठा-पुष्य-पुनर्वसुनक्षत्राणि, वासरेषु रवि-बुध-गुरु-शुक्रवासराः, तिथिषु रिक्तातिथीन् विहाय शेषतिथयः ग्राह्याः भवन्ति। मंगलवासरे रक्तवस्त्रधारणं कल्याणप्रदं भवति। सौभाग्यशालिन्यः स्त्रियः उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-रोहिणी-पुनर्वसु-पुष्यनक्षत्रेषु प्रवालादिवस्तूनि नैव धारयेयुः।

(२) नूतनवस्त्रस्य दग्धे स्फुटिते पङ्कादिलिप्ते सति शुभाशुभत्वम् -

अस्मिन् बिन्दौ नूतनवस्त्र-आसन-शय्यादिकेषु प्रथमधारणावसरे कुत्रचित् दग्धे स्फुटिते पङ्कादिलिप्ते सति तद्वस्त्रं धारणीयं न वा, इति विवेचितं वर्तते। सर्वप्रथमं नूतनवस्त्रस्य नवभागाः कर्तव्याः। तेषु नवभागेषु चतुष्कोणे देवांशाः स्थापनीयाः। अवशिष्टभागेषु ऊर्ध्वाधररूपेण मध्यस्थत्रिभागेषु राक्षसांशाः स्थाप्यन्ते। इदानीम् अवशिष्टयोः पार्श्वस्थयोः द्वयोः भागयोः मनुष्यांशौ ज्ञेयौ। अतः परं वस्त्रस्य यद्भागः दग्धः स्फुटितः पङ्कादिलिप्तः वा विद्यते, तद्भागः कस्य अंशे अस्ति, इति ज्ञायते। यदि तद्भागः देवांशेषु अर्थात् चतुष्कोणेषु वर्तते तर्हि शुभप्रदम्, यदि राक्षसांशेषु अर्थात् ऊर्ध्वाधरमध्यस्थत्रिभागेषु वर्तते तर्हि अशुभप्रदम्, यदि वा अवशिष्टयोः मनुष्यभागयोः समायाति तर्हि शुभप्रदं ज्ञातव्यमिति चिन्तितं वर्तते।

(३) नक्षत्र-वारादिभिः निषेधे अपि वस्त्रधारणे विशेषः -

अस्मिन् बिन्दौ वर्णितमस्ति यत् निषिद्धनक्षत्रवार-तिथि-योग-भद्रादिदुष्टयोगेष्वपि केषुचित् विशिष्टपरिस्थितिषु नूतनवस्त्रं धारयितुं शक्यते, तद्यथा - ब्राह्मणस्य आज्ञया, विवाहादिमंगलवासरेषु प्राप्तानि, नृपेन प्रसन्नतया प्रदत्तानि वस्त्राणि कस्मिन्नपि काले धारयितुं शक्यते।

(४) लतापादपारोपण-राजदर्शन-मद्यनिर्माण-गोक्रयविक्रयमुहूर्ताः -

अस्मिन् बिन्दौ लतापादपारोपण-राजदर्शन-मद्यनिर्माणगोक्रयविक्रयमुहूर्ताः पृथक् पृथग्रूपेण उल्लिखिताः सन्ति। लतापादपरोपणार्थं विशाखा-मूल-चित्रा-अनुराधा-मृगशिरस्-स्वाती-रोहिणी-उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-हस्त-अश्विनी-पुष्य-अभिजित्-श्रवण-धनिष्ठनक्षत्राणि, मद्यनिर्माणार्थं मूल-ज्येष्ठा-आर्द्रा-आश्लेषा-भरणी-मघा-पूर्वफाल्गुनी-पूर्वाषाढ-पूर्वभाद्रपद-शतभिषानक्षत्राणि, गवादिपशूनां क्रयविक्रयार्थं हस्त-अश्विनी-पुष्य-अभिजित्-रेवती-विशाखा-पुनर्वसु-ज्येष्ठा-शताभिषा-धनिष्ठानक्षत्राणि शुभदानि भवन्ति।

(५) औषधग्रहणमुहूर्तः -

अस्मिन् बिन्दौ प्रथमवारम् औषधग्रहणस्य मुहूर्तः निर्दिष्टः वर्तते। औषधग्रहणार्थं हस्त-अश्विनी-पुष्य-अभिजित्-मृगशिरा-रेवती-चित्रा-अनुराधा-स्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषा-मूलनक्षत्राणि, मिथुन-कन्या-धनु-मीनलग्नानि, रवि-चंद्र-बुध-गुरु-शुक्रवासराः शस्ताः कथिताः सन्ति।

४.१० शब्दावली

१. करपञ्चक - करः हस्तः, हस्तनक्षत्रात् आरभ्य पञ्चनक्षत्राणि अर्थात् हस्त, चित्रा, स्वाती, विशाखा, अनुराधा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२.	अदितियुगे	–	अदितिः पुनर्वसुः, युगे द्वये। पुनर्वसुनक्षत्रात् आरभ्य द्वे नक्षत्रे अर्थात् पुनर्वसुः पुष्यं च।
३.	राधा	–	विशाखानक्षत्रम्।
४.	ध्रुवम्	–	ध्रुवसंज्ञकनक्षत्राणि।
५.	लघु/क्षिप्रम्	–	लघुसंज्ञकनक्षत्राणि/क्षिप्रसंज्ञकनक्षत्राणि।
६.	मृदु	–	मृदुसंज्ञकनक्षत्राणि।
७.	तीक्ष्णम्	–	तीक्ष्णसंज्ञकनक्षत्राणि।
८.	उग्रम्	–	उग्रसंज्ञकनक्षत्राणि।
९.	चरम्	–	चरसंज्ञकनक्षत्राणि।
१०.	द्व्यङ्गम्	–	द्विस्वभावलग्नम्।
११.	भैषज्यम्	–	औषधग्रहणम्।
१२.	विदि	–	बुधवासरे।
१३.	अम्बुपः	–	शतभिषा।
१४.	वासवम्	–	धनिष्ठा।
१५.	अमराः	–	देवाः।
१६.	दग्धे	–	ज्वलिते।
१७.	दध्यात्	–	धारयेत्।
१८.	पौष्णम्	–	रेवती।
१९.	विरिक्त	–	रिक्तातिथीन् विहाय।

४.११ सन्दर्भग्रन्थः

१. मुहूर्तचिन्तामणि – रामाचार्यकृत्, चौखम्बा संस्कृत भवन, वाराणसी।

४.१२ सहायकग्रन्थाः

१. मुहूर्तचिन्तामणिः – पीयूषधारासंस्कृतटीका, मोतीलाल बनारसीदास, वाराणसी।
२. मुहूर्तचिन्तामणिः – कपिलेश्वरव्याख्या, चौखम्बा संस्कृत संस्थान, वाराणसी।
३. मुहूर्तमार्तण्डः, चौखम्बा संस्कृत संस्थान, वाराणसी।

४.१३ बोधप्रश्नोत्तराणि

१. उपर्युक्तपद्ये मूंगापन्नादिरत्न-हस्तिदन्त-शङ्ख-स्वर्ण-नूतनवस्त्राणां प्रथमवारं धारणस्य मुहूर्तः उल्लिखितः वर्तते।

२. रत्नधारणे रेवती-उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-रोहिणी-अश्विनी-हस्त-चित्रा-स्वाती-विशाखा-अनुराधा-धनिष्ठा-पुष्य-पुनर्वसु-नक्षत्राणि कथितानि सन्ति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. रत्नादिधारणे शनैश्चर-चंद्रवासर-मंगलवासराः त्याज्याः भवन्ति।

४. (द) ४, ६, १४

५. (द) उपर्युक्तासु सर्वासु परिस्थितिषु

६. (स) नव

७. (अ) चतुष्कोणे

८. (अ) शुभम् (ब) अशुभम् (स) शुभम्

९. (ब) ब्राह्मणस्य आज्ञया

१०. (ब) विवाहः

११. निन्द्ये घिष्ण्ये वारादौ अपि ब्राह्मणस्य आज्ञया, विवाहावसरे प्राप्तानि प्रसन्नभावेन नृपेन दत्तानि च वस्त्राणि धारणीयानि।

१२. वृक्षारोपणार्थं विशाखा-मूल-चित्रा-अनुराधा-मृगशिरा-रेवती-रोहिणी-उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-शतभिषा-हस्त-अश्विनी-पुष्य-अभिजिन्नक्षत्राणि शस्तानि वर्तन्ते।

१३. नृपदर्शनार्थं रोहिणी-उत्तरफाल्गुनी-उत्तराषाढ-उत्तरभाद्रपद-चित्रा-अनुराधा-मृगशिरा-रेवती-हस्त-अश्विनी-पुष्य-अभिजित्-श्रवण-धनिष्ठानक्षत्राणि शस्तानि सन्ति।

१४. मद्यनिर्माणार्थं मूल-ज्येष्ठा-आर्द्रा-आश्लेषा-भरणी-मघा-पूर्वफाल्गुनी-पूर्वाषाढ-पूर्वभाद्रपद-शतभिषानक्षत्राणि विहितानि सन्ति।

१५. गवादिपशूनां क्रयविक्रयार्थं हस्त-अश्विनी-पुष्य-अभिजित्-रेवती-विशाखा-पुनर्वसु-ज्येष्ठा-शतभिषा-धनिष्ठानक्षत्राणि उपयुक्तानि सन्ति।

१६. औषधग्रहणार्थं हस्त-अश्विनी-पुष्य-अभिजित्-मृगशिरा-रेवती-चित्रा-अनुराधा-स्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषा-मूलनक्षत्राणि शुभानि सन्ति।

१७. औषधग्रहणार्थं द्विस्वभावलग्नानि अर्थात् मिथुन-कन्या-धनु-मीनलग्नानि शस्तानि सन्ति।

१८. औषधग्रहणार्थं रवि-चंद्र-बुध-गुरु-शुक्रवासराः शुभाः सन्ति।

१९. (अ) प्रथमवारम्।

४.१३ अभ्यासप्रश्नाः

१. प्रवालादिधारणमुहूर्ते कानि नक्षत्राणि विचार्यन्ते ?

२. सौभाग्यशालिन्यः स्त्रियः कदा प्रवालादिवस्तूनि धारयेयुः ?

३. दग्धवस्त्रस्य शुभाशुभत्वज्ञानाय वस्त्रस्य नवभागाः कथं क्रियन्ते ?

४. निषिद्धनक्षत्रवारेषु अपि नवीनवस्त्रं कदा धारयितुं शक्यते ?

५. नृपदर्शनं किमर्थं महत्वपूर्णं विद्यते ?

६. औषधग्रहणमुहूर्ते विहितनक्षत्रवारलग्नानि विलिख्यन्ताम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमः पाठः - क्रयविक्रयभूषाघटनादिमुहूर्ताः

पाठसंरचना

५.१ प्रस्तावना

५.२ उद्देश्यम्

५.३ क्रयविक्रयनक्षत्रेषु परस्परनिषेधः

५.३.१ क्रयविक्रयपरिभाषा

५.३.२ क्रयविक्रयनक्षत्रेषु परस्परनिषेधः

५.३.४ विक्रयविपण्योर्मुहूर्त्तौ

५.४ मतान्तरवचनानि

५.५ अश्वहस्तिक्रयविक्रयमुहूर्त्ताः

५.५.१ अश्वचक्रहस्त्यङ्कुशारोपण-अश्वगजारोहणचक्रम्

५.५.२ मतान्तरवचनानि

बोधप्रश्नाः

५.६ भूषाघटनादिमुहूर्त्तः

५.६.१ वसिष्ठादि-आचार्याणां मतानि

५.६.२ रौप्यसुवर्णपात्रे भोजनमुहूर्त्तः

५.७ मुद्रापातनवस्त्रक्षालनमुहूर्त्तः

५.७.१ गणेशदैवज्ञस्य मतम्

५.७.२ चण्डेश्वरमतम्

बोधप्रश्नाः

५.८ सारांशः

५.९ शब्दावली

५.१० सन्दर्भग्रन्थः

५.११ सहायकग्रन्थः

५.१२ बोधप्रश्नोत्तराणि

५.१३ अभ्यासप्रश्नाः

५.१ प्रस्तावना

मुहूर्त्तचिन्तामणेः पञ्चमपाठे भवतः सुस्वागतं वर्तते। पञ्चमपाठस्य पूर्वं प्रवालादि-मुहूर्त्तस्याध्ययनं कृतं भवता। चतुर्थपाठेऽस्मिन् प्रवालादिधारणं केषु नक्षत्रेषु करणीयम्? इत्यस्मिन् विषये भवान् अधीतवान्। एतेषां नक्षत्राणां नामानि क्रमेण अत्र प्रतिपादितानि सन्ति। उत्तरफाल्गुनी-उत्तराषाढा-उत्तरभाद्रपद-रोहिणी-हस्त-चित्रा-स्वाती-विशाखा-अनुराधा-घनिष्ठा-पुष्य-पुनर्वसव इत्येतानि नक्षत्राणि प्रवालादिधारणे शस्तानि इति अधीतं भवता। मंगलवासरे रक्तवस्त्रस्य धारणं शुभं भवति। सौभाग्यशालिस्त्रियः उत्तरफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपद- रोहिणी-पुनर्वसु-पुष्ये नक्षत्रेषु प्रवालादिवस्तूनि न धारयेयुः। विषयोऽयं भवता अधीतः। तदनन्तरं दग्ध-स्फुटित-पङ्कादिलिप्तनूतनवस्त्रस्य शुभाशुभत्वं भवान् अधीतवान्। दुर्योगेऽपि वस्त्रधारणे कः विशेषो वर्तते? अस्मिन् दुर्योगे वस्त्रधारणे विशेषस्याध्ययनं कृतमिति। अत्र लतापादपारोपण-राजदर्शन-मद्यनिर्माण-गोक्रयविक्रयमुहूर्त्तान् अपि भवान् पठितवान्। इदानीं पञ्चमे पाठे भवान् क्रयविक्रयमुहूर्त्तस्य अध्ययनं करिष्यति। क्रयो नाम मूल्यं दत्वा वस्तुग्रहणमिति। यदा तु क्रयिणा क्रयमुहूर्त्तः प्राप्यते तदा विक्रेत्रे क्रयमाणवस्तुनः मूल्यं दत्वा विक्रीतं वस्तु गृह्यते तत्कर्म क्रयशब्दवाच्यमिति। विक्रेत्रा विक्रयार्थं यदा क्रयिणोऽनुज्ञां लब्ध्वा यावदिष्टं वस्तुं स्वगृहात् स्वस्थानात् वा पृथक् क्रियते तदा तत्कर्म विक्रयशब्दवाच्यमिति। अनन्तरं विक्रयविपण्योर्मुहूर्त्तः,

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अश्वहस्तिक्रयविक्रयमुहूर्ताः, भूषाघटनादिमुहूर्त्तः, वसिष्ठादि-आचार्याणां मतानि, रौप्यसुवर्णपात्रे भोजनमुहूर्तः, मुद्रापालनवस्त्रक्षालनमुहूर्त्तः, गणेशदैवज्ञादीनां मतानि चण्डेश्वरमतञ्चेत्येतेषां विषयाणां मुहूर्तानां अध्ययनं भवान् करिष्यति पाठेऽस्मिन्।

५.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान्-

- क्रयविक्रयमुहूर्त्तयोः प्रतिपादने समर्थो भविष्यति।
- क्रयविक्रयनक्षत्रेषु परस्परनिषेधं ज्ञास्यति।
- विक्रयविपण्योः मुहूर्त्तनिर्धारणे प्रवीणो भविष्यति।
- अश्वहस्तिक्रयविक्रयमुहूर्त्तानां प्रतिपादने नैपुण्यं प्राप्स्यति।
- भूषाघटनादिमुहूर्त्तप्रतिपादने समर्थो भविष्यति।
- मुद्रापातनवस्त्रक्षालनादिकृत्येषु नैपुण्यं भविष्यति।

५.३.१ क्रयविक्रयपरिभाषा

क्रयशब्दः क्रीघातोरच् प्रत्ययात् निष्पद्यते। क्रयो नाम मूल्यं दत्वा वस्तुग्रहणमिति। यदा तु क्रयिणा क्रयमुहूर्त्तः प्राप्यते तदा विक्रेत्रे मूल्यं द्रव्यं दत्वा पृथक् कृतं विक्रीतं वस्तु गृह्यते तत्कर्म क्रयशब्दवाच्यमिति। विक्रयशब्दः वि-उपसर्गपूर्वकं क्रीघातोरच् प्रत्ययेन निष्पद्यते। विक्रयो नाम वस्तुनः मूल्यं गृहीत्वा तस्य वस्तुनः क्रेतुः कृते अर्पणम् इति। विक्रेता यदा क्रयिणोऽनुज्ञां लब्ध्वा यावदिष्टं वस्तुं स्वगृहात् स्वस्थनात् वा पृथक् करोति तदा तत्कर्म विक्रयशब्देन व्यवहृयते। अनयोः क्रयविक्रयशब्दयोः प्रयोगः प्राचीनकालेऽपि भवति स्म। तदनन्तरं मुद्राशब्दस्य प्रयोगो भवति स्म। मानवाः मुद्रामाध्यमेन क्रयणं विक्रयणञ्च कुर्वन्ति स्म। आधुनिककाले तु ए.टी.एम. अन्तर्जालादिमाध्यमेनापि क्रयो विक्रयश्च भवति। अत्र क्रयविक्रययोः मुहूर्त्तः आचार्यरामदैवज्ञेन मुहूर्त्तचिन्तामणौ ग्रन्थे प्रतिपादितोऽस्ति। मुहूर्त्तशब्दस्य अभिप्रायः भवति कालविशेषः। कस्मिन् काले मुहूर्त्ते वा क्रयः विक्रयः वा कर्त्तव्योऽकर्त्तव्यो वा। प्राचीनकालादेव दैवज्ञैः स्व-स्वग्रन्थे मुहूर्त्तस्य विचारः कृतो वर्तते। क्रयमुहूर्त्ते अभीष्टवस्तुनः मूल्यं दत्वा तस्य स्वाधिकरणं शुभं भवति तथैव विक्रयमुहूर्त्ते वस्तुनः मूल्यं स्वीकृत्य प्रत्यर्पणं शुभं भवति। अत्रेदमप्यवधेयं यत् एकस्मिन्नेव काले एकेन वस्तुनः क्रयणं तथा अपरेण विक्रयणं क्रियते। इत्थम् उभयोः क्रेतृ-विक्रेतोः कृते शुभमुहूर्त्तः आवश्यकः। किन्तु समकालिकक्रयमुहूर्त्तः विक्रयमुहूर्त्तो वा भवेत् इति सर्वथा सर्वदा न सम्भवति। अस्यां स्थितौ उभयोः क्रेतृ-विक्रेतोर्मध्ये क्रेतुः कृतेः शुभः क्रयमुहूर्त्तः अवश्यं द्रष्टव्यः इति रामाचार्यमतम्।

५.३.२ क्रयविक्रयनक्षत्रेषु परस्परनिषेधः

रामाचार्यः क्रय-विक्रयनक्षत्रेषु अन्यतरे सति अपरकर्मणः निषेधं उक्तवान्। अर्थात् क्रयनक्षत्रे विक्रयः न कार्यः तदा विक्रयनक्षत्रे क्रयः न कार्यः। किन्तु अत्र वदतो व्याघात इव आभासते। यतः यदि क्रयमुहूर्त्ते विक्रयस्य निषेधः तर्हि कथं विक्रेता क्रेत्रे स्ववस्तुनः विक्रयणं कुर्यात्। एवं विक्रयणस्य अभावे कथं क्रेता क्रयमुहूर्त्ते वस्तुनः क्रयं कुर्यात्। इत्थमुं विचारं सम्यक्तया पीयूषधारटीकायां गोविन्दाचार्यः अकरोत्। तदत्र उपस्थाप्यते। आदौ रामाचार्योक्तः क्रय-विक्रयनिषेधनिर्देशपूर्वकः श्लोकः प्रस्तूयते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५.३.३ क्रयविक्रयनक्षत्रेषु परस्परनिषेधः

आचार्यरामदैवज्ञेन क्रयविक्रयनक्षत्रेषु परस्परनिषेधः अनेन प्रकारेण प्रतिपादितः वर्तते स्वरचितमुहूर्तचिन्तामणिग्रन्थे।

क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षे क्रयोऽपि न।
पौष्णाम्बुपाश्विनीवातश्रवश्चित्राः क्रये शुभाः॥

अन्वयः - क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षे क्रयोऽपि न (भवति)। क्रये पौष्णाम्बुपाश्विनीवातश्रवश्चित्राः शुभाः (भवन्ति)।

प्रतिपदार्थः - क्रयः = क्रयो नाम मूल्यं दत्त्वा वस्तुग्रहणम्। ऋक्षे = नक्षत्रे। नेष्टः = न कार्यः। विक्रयः = विक्रयो नाम मूल्यं ग्रहीत्वा वस्तुदानम्। ऋक्षै = नक्षत्रे। क्रयोऽपि न = क्रयनक्षत्रे विक्रयो न करणीयः। पौष्णम् = रेवतीनक्षत्रम्। अम्बुपः = शततारकाः। अश्विनी = अश्विनीनक्षत्रम्। वातः = स्वाती। श्रवः = श्रवणः। चित्रा = चित्रानक्षत्रम्। एतानि नक्षत्राणि क्रये शुभानि भवन्ति। क्रये = वस्तुग्रहणे। शस्ताः = शुभाः।

भावार्थः - क्रयो नाम मूल्यं दत्त्वा वस्तुग्रहणम्। वक्ष्यमाणक्रयनक्षत्रेषु ये जनाः विक्रयं कुर्वन्ति तेषां जनानां कृते हानिः भवति। अतएव आचार्येण क्रयनक्षत्रेषु विक्रयो न कार्य इति कथितम् इति। मूल्यं गृहीत्वा वस्तुदानं विक्रयो भवति। कथितविक्रयनक्षत्रेषु ये जनाः क्रयादिकार्यं कुर्वन्ति तेषं जनानां कृते अशुभं भवति। अतएव विक्रयनक्षत्रेषु क्रयो न कार्यः इति कथितमाचार्येण रामदैवज्ञेन। क्रयः केषु नक्षत्रेषु करणीयः? एतेषां क्रयनक्षत्राणां नामानि अनेन प्रकारेण कथितानि-रेवती-शतभिषक्-अश्विनी-स्वाती-श्रवण-चित्राः। एतानि कथितानि नक्षत्राणि क्रये शुभानि भवन्ति। एतेषु नक्षत्रेषु विक्रयः न करणीयः। आचार्यस्य तात्पर्यमिदं वर्तते यत् क्रयकार्ये यानि नक्षत्राणि पठितानि सन्ति तेषु नक्षत्रेषु क्रयकार्यः कर्तव्यः न तु विक्रयनक्षत्रेषु। विक्रयस्य कृते यानि नक्षत्राणि पठितानि सन्ति तेषु नक्षत्रेषु केवलं विक्रयकार्यः करणीयः न तु क्रयनक्षत्रेषु।

यथा पूर्वं चर्चा कृता यत् यदि क्रयमुहूर्त्ते विक्रयस्य एवं विक्रयमुहूर्त्ते क्रयस्य निषेधः वर्तते तर्हि उभयोरेकतस्य अभावे क्रय-विक्रयणकार्यं कथं सम्पद्येत् इति जिज्ञासा मनसि जागर्ति अत्रेदं प्रथमम् अवधेयं यत् सामान्यव्यवहारे प्रयुक्तानां तैलादिवस्तूनां क्रय-विक्रयणे मुहूर्त्त अनावश्यकः यतोहि एतेषां कालविशेषे क्रयणं-विक्रयणं वा न जातु सम्भावि। किञ्च विशेषवस्तूनां महर्घवस्तूनां क्रय-विक्रयणे मुहूर्त्तस्य अत्यावश्यकता भवति। अस्यां स्थितौ क्रय-विक्रयव्यवहारः कथं कार्यः। पीयूषधाराटीकाकारः विषयममुं भृशं समालोचितवान्। तदेव सारवत् बिन्दुरूपेण उपस्थाप्यते -

1. यदि क्रेतुः कृते वस्तुनः क्रयणं परमावश्यकं तर्हि क्रयमुहूर्त्तं वीक्ष्य तस्मिन् मुहूर्त्ते विक्रेता वस्तु दद्यात्। कालेऽस्मिन् विक्रयार्थं मध्यमनक्षत्राणां ग्रहणं कर्तुं शक्यते। तथैव विक्रेतुः कृते वस्तुनः विक्रयणं यदि अत्यावश्यकं तर्हि विक्रयमुहूर्त्तमनुसृत्य मध्यमक्रयमुहूर्ते वस्तुनः विक्रयणं कार्यम्।

2. अथवा उभावपि क्रेतृ-विक्रेतारौ क्रय-विक्रयणमुहूर्त्तं वर्जयित्वा मध्यममुहूर्ते व्यवहारं कुर्याताम्।

3. अथवा मुहूर्त्तचिन्तमणौ आचार्यरामदैवज्ञेन क्रयमुहूर्ते केवलं नक्षत्रस्य प्रयोगः कृतो वर्तते। तिथिवारलग्नादीनां प्रयोगः न कृतोऽस्ति। किन्त्वत्र विक्रयमुहूर्ते नक्षत्रेण सह तिथिवारलग्नादीनामपि प्रयोगो कृतो वर्तते। यदि क्रयनक्षत्राणि वर्जयित्वा अन्येषु नक्षत्रेषु क्रयो भवेत् तदा तस्य क्रयस्य फलं मध्यमं कथितं वर्तते पीयूषधाराटीकायामिति। विक्रयनक्षत्राणि

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परित्यज्य अन्येषु नक्षत्रेषु विक्रयणं यदि करोति तदा तस्य विक्रयस्य फलमपि मध्यमं भवति। अत्र क्रयविक्रयनक्षत्राणि वर्जयित्वा अन्येषु नक्षत्रेषु क्रयं विक्रयं वा करोति चेत् तदा तयोः फलं मध्यमं भवति। एतादृशी चर्चा केवलं पीयूषधाराटीकायां वर्तते। अतः क्रयविक्रयनक्षत्रेभ्यो भिन्ननक्षत्रेषु क्रयविक्रयौ मध्यमौ भवतः।

विक्रेता स्ववस्तु विक्रयस्य मुहूर्त्ते क्रेतुरनुमत्या स्वभण्डारेण विक्रयार्थं दूरं यदि स्थापयेत् तदा विक्रयोऽयं भवति। इदानीं क्रेता क्रयस्य मुहूर्त्ते वस्तुमूल्यं दत्वा तद्वस्तु स्वाधिकारे कुर्यात् तदा क्रयोऽयं संजातः।

५.४ विक्रयविपण्योर्मुहूर्त्तौ

आचार्यरामदैवज्ञमहोदयेन विक्रयविपण्योर्मुहूर्त्तौ प्रतिपादितौ मुहूर्त्तचिन्तामणौ। अत्र विपणि-उद्घाटनस्य कृते मुहूर्त्तोऽपि प्रतिपादितः रामदैवज्ञेन। विपण्+इन् = विपण + ङीष् प्रत्ययात् स्त्रीलिङ्गस्यैकवचने विपणिरितिपदं निष्पन्नं भवति। विपणिर्नाम विक्रयस्य कृते स्थापितं वस्तु यस्यां शालायां यस्मिन् स्थाने वा विद्यते तत् विपणिः भवति (दुकान इति हिन्दीभाषायाम्)। विपणिशालायाः कदा उद्घाटनं करणीयमित्येतस्मिन् विषये आचार्येण प्रतिपादितं वर्तते। प्राचीनकालेऽपि जनाः विपण्युद्घाटनं कुर्वन्ति स्म। अतएव जनानां कृते विक्रयविपण्योर्मुहूर्त्तौ अत्र वर्णितौ आचार्यरामदैवज्ञेन।

पूर्वाद्वीशकृशानुसार्पयमभे केन्द्रत्रिकोणे शुभैः।
षट्त्र्यायेष्वशुभैर्विना घटतनुं सन्विक्रयः सतिथौ।
रिक्ताभौमघटान्विना च विपणिर्मैत्रध्रुवक्षिप्रभै-
र्लग्ने चन्द्रसिते व्ययाष्टरहितैः पापैः शुभैर्द्व्यायखे॥

अन्वयः - पूर्वाद्वीशकृशानुसार्पयमभे केन्द्रत्रिकोणे शुभैः षट्त्र्यायेषु अशुभैः घटतनुं विना सतिथौ विक्रयः सत् (भवति)। रिक्ताभौमघटान्विना च मैत्रध्रुवक्षिप्रभैर्लग्ने चन्द्रसिते पापैः व्ययाष्टरहितैः द्व्यायखे शुभैः विपणिः इति।

प्रतिपदार्थः - पूर्वाः = पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा चैतानि त्रीणि नक्षत्राणि। द्वीशः = विशाखा। कृशानुः = कृत्तिका। सार्पः = आश्लेषा। यमभं = भरणी। भे = नक्षत्रे। केन्द्रम् = केन्द्रस्थानम् (१/४/७/१० एते भावाः भवन्ति)। त्रिकोणम् = त्रिकोणस्थानम् (१/५/९ भावाः) शुभैः = शुभैः ग्रहैः (पूर्णचन्द्रः बुधः शुक्रः बृहस्पतिश्चैते ग्रहाः शुभग्रहाः भवन्ति)। षट्त्र्यायेषु = षट्-त्रि-आयश्चेति (६, ३, ११ एतेषु स्थानेषु) अशुभैः = न शुभ इति अशुभः एतैः अशुभैः (क्षीणचन्द्रः-भौमः सूर्यः शनिः राहुश्चैते ग्रहाः अशुभाः भवन्ति)। घटलग्नम् = कुम्भलग्नम्। विना = वर्जयित्वा। सतिथौ = तिथिभिः सहिता सतिथिः सप्तमीविभक्तेः एकवचने सतिथौ इति। विक्रयः = विक्रयः प्रसिद्धः। सत् = शुभः। रिक्ताः = रिक्ततिथयः (चतुर्थी-नवमी-चतुर्दशीतिथयः)। भौमः = मंगलवारः। घटलग्नं = कुम्भलग्नम्। एतान्विना = एतान् वर्जयित्वा। मैत्रसंज्ञकानि-उत्तराफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा रोहिणी चैतानि नक्षत्राणि मैत्रसंज्ञकानि। क्षिप्रसंज्ञकानि = हस्त-अश्विनी-पुष्यनक्षत्राणि क्षिप्रसंज्ञकानि। भैः = नक्षत्रमितैः। लग्ने = उदिते लग्ने। चन्द्रः = शशिः। सितः = शुक्रः भार्गवो वा भृगोरपत्यं पुमान् भार्गवोऽर्थात् शुक्रः। पापैः = अशुभग्रहैः, व्ययभावः = द्वादशभावः, अष्टभावः = अष्टमभावप्रसिद्धः। रहितैः = वर्जितैः। अर्थात् व्ययाष्टरहितैः। द्वि = द्वितीयस्थानम्। आयः = एकादशस्थानम्। खे = दशमस्थाने। शुभैः = अतिशस्तैः। द्व्यायदशमस्थानेषु स्थितैः शुभग्रहैः। विपणिः = क्रयविक्रयाख्यं कर्म यत्र भवति (हिन्दी भाषायां 'दुकान' इति)।

भावार्थः - पद्येऽस्मिन् विक्रयविपण्योर्मुहूर्त्तौ प्रतिपादितौ वर्तेते आचार्यरामदैवज्ञेन।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विक्रयमुहूर्त्ते कानिचित् नक्षत्राणि आगच्छन्ति। एतेषां नक्षत्राणां नामानि प्रतिपादितानि सन्ति। पूर्वाफाल्गुनी पूर्वाषाढा पूर्वाभाद्रपदा विशाखा कृतिका आश्लेषा भरणी चैतेषु सप्तसु नक्षत्रेषु विक्रयः कार्यः कर्तव्यः। यदि लग्नस्थानात् केन्द्रस्थानेषु (१, ४, ७, १०) त्रिकोणस्थानेषु च (१, ५, ९) शुभग्रहाः (पूर्णचन्द्रः बृहस्पतिः बुधः शुक्रश्चैते ग्रहाः) भवेयुस्तदा विक्रयकार्यकृते सति शुभो भवति। लग्नस्थानाच्चेत् पापग्रहाः तृतीय-षष्ठ-एकादशस्थानेषु गताः स्यस्तदा विक्रयोऽतिशस्तो भवति। एते पापग्रहाः कुम्भलग्नं वर्जयित्वा अन्यलग्नेषु गताः स्युस्तदा विक्रयः शुभो भवति। अत्र विक्रयमुहूर्त्ते आचार्येण तिथयोऽपि गृहीताः सन्ति। तिथीनां नामानि क्रमेण प्रतिपादितानि सन्ति। प्रतिपदा द्वितीया तृतीया पञ्चमी सप्तमी दशमी एकादशी त्रयोदशी चैताः तिथयो भवन्ति। एतासु तिथीषु विक्रयः शुभो भवति। पञ्चदशतिथीषु केवलं अष्टतिथयः गृहीताः सन्ति। अत्र चतुर्थी षष्ठी अष्टमी नवमी द्वादशी चतुद्रशी अमावस्या पूर्णिमा चैताः तिथयः न स्वीकृताः सन्ति। उपरिलिखितैः नक्षत्र-तिथिभिः सह ग्रहाणां स्थितिरपि अवलोक्यते विक्रयादिकार्येषु। यद्यत्र विक्रयनक्षत्रेषु वर्णिततिथि-नक्षत्रसंयोगः स्यात्, तस्मिन् दिने शुभग्रहाश्चेत् केन्द्रे त्रिकोणे वा गताः स्युः, पापग्रहाः यदि त्रि-षट्-आयस्थनेषु स्थिताः भवेयुस्तदा विक्रयः शुभो भवति। विक्रयमुहूर्त्तस्य विषयेऽऽचार्यश्रीपतिना प्रोक्तमिति-

दशमैकादशे लग्ने वित्तकेन्द्रत्रिकोणगैः।
शुभं पुण्यस्य कर्मोक्तं वर्जयित्वा घटोदय॥

आचार्यश्रीपतिमहोदयेनोक्तं यत् यदि शुभग्रहाः लग्नस्थानात् दशमभावे एकादशभावे धनभावे केन्द्रस्थाने त्रिकोणस्थाने गताः स्युस्तदा विक्रयः शस्तो भवति। अत्र केवलं कुम्भलग्नं वर्जयित्वा शेषलग्नेषु विक्रयः शुभः भवति। आचार्यरामदैवज्ञेन कथितं वर्तते यत् पद्येऽस्मिन् विपणिमुहूर्त्तस्य यानि नक्षत्राणि प्रतिपादितानि सन्ति तेषु नक्षत्रेषु एव विपणिः उद्घाट्या आरम्भणीया वा। अत्र मित्रसंज्ञकानि (मृगशिरा-रेवती-चित्रा-अनुराधा एतानि नक्षत्राणि), ध्रुवसंज्ञकानि (उत्तराफाल्गुनी-उत्तराभाद्रपदा-उत्तराषाढा-रोहिण्य इत्येतानि नक्षत्राणि), क्षिप्रसंज्ञकानि (हस्त-अश्विनी-पुष्या इत्येतानि नक्षत्राणि) भवन्ति। एतेषु नक्षत्रेषु यदि विपण्याः उद्घाटनं भवेत् तदा उत्तमो भवति। रिक्तातिथिं वर्जयित्वा (४/९/१४ तिथयः) प्रतिप्रदा-द्वितीय-तृतीया-पञ्चमी-षष्ठी-सप्तमी-अष्टमी-दशमी-एकादशी-द्वादशी-त्रयोदशी-अमावस्या चेतासु तिथिषु विपणिकार्यं करणीयम्। अत्र सप्तवारेषु केवलं भौमवारः वर्जितः रामदैवज्ञेन। लग्नविषये तत्र कथितं वर्तते यद् कुम्भलग्नं वर्जयित्वा यदि लग्नस्थाने चन्द्रसितौ स्थितौ भवेताम्, द्वादशद्वितीयभावयोः पापग्रहाः न भवेयुः, द्वितीय-एकादश-दशमस्थानेषु यदि शुभग्रहाः स्थिताः भवेयुस्तदा विपणिकार्यं कर्तव्यम्। अत्र रविसोमबुधगुरुशुक्रशनिवारेषु तथा च प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठ-सप्तम-अष्टम-नवमैकादश-द्वादशलग्नेषु विपणिकार्यकृते सति शुभप्रदं भवति।

विक्रयमुहूर्त्तचक्रम्

नक्षत्राणि	शुभग्रहाः	अशुभग्रहाः	तिथयः	लग्नानि	वासराः
पूर्वाफाल्गुनी	बुधः	क्षीणचन्द्रः	प्रतिपदा	1, 2, 3,	रविः
पूर्वाषाढा	बृहस्पति	सूर्यः	द्वितीया	4, 5, 6,	सोमः
पूर्वाभाद्रपदा	शुक्रः	भौमः	तृतीया	7, 8, 9,	बुधः
विशाखा	पूर्णचन्द्रः	राहुः	पञ्चमी	10, 12	गुरुः
कृत्तिका		शनिः	सप्तमी		शुक्रः
आश्लेषा			दशमी		शनिः
भरणी			एकादशी		
			त्रयोदशी		

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विपणिमुहूर्त्तचक्रम्

नक्षत्राणि	शुभग्रहाः	अशुभग्रहाः	तिथयः	वासराः	लग्नानि
उत्तराफाल्गुनी	पूर्णचन्द्रमा	क्षीणचन्द्रमा	प्रतिपदा	रविवासरः	1, 2,
उत्तराषाढा	वृहस्पतिः	भौमः	द्वितीया	सोमवासरः	3, 4,
उत्तराभाद्रपदा	बुधः	सूर्यः	तृतीया	बुधवासरः	5, 6,
रोहिणी	शुक्रः	शनिः	पञ्चमी	गुरुवासरः	7, 8,
मृगशिरा		राहुः	षष्ठी	शुक्रवासरः	9, 10,
रेवती, चित्रा			सप्तमी	शनिवासरः	12
अनुराधा			अष्टमी		
हस्तः			दशमी		
अश्विनी			एकादशी		
पुष्यम्			त्रयोदशी		
			अमावस्या		

५.४.१ मतान्तरवचनानि

आचार्यरामदैवज्ञकृतमुहूर्त्तचिन्तामणिनामकग्रन्थे विक्रयविपण्योः मुहूर्त्ते स्वल्पं मतान्तरं दृश्यते। ग्रन्थेऽस्मिन् विक्रयस्य मुहूर्त्ते यानि नक्षत्राणि अधिगतानि सन्ति तेषु नक्षत्रेषु मतान्तरं तु नास्ति केवलं लग्ने एव अन्तरं दृश्यते। आचार्यरामदैवज्ञेन कथितं वर्तते यच्चेत् शुभग्रहाः केन्द्रे त्रिकोणस्थाने च गताः स्युस्तदा विक्रयः शुभः प्रोक्तः। पापग्रहाः त्रिषडायस्थाने गतास्तदा अतिशस्ताः भवन्ति। अत्र केवलं कुम्भलग्नं परित्यज्य शेषलग्नेषु विक्रयकार्यं शुभः स्वीकृतोऽस्ति। आचार्यश्रीपतिमहोदयेन किञ्चिद् भिन्नं उक्तम्। यथा –

दशमैकादशे लग्ने वित्तकेन्द्रत्रिकोणैः।
शुभं पुण्यस्य कर्मोक्तं वर्जयित्वा घटोदयम्॥

अत्र घटोदयमिति पदस्यार्थः कुम्भलग्नं भवति। यदि शुभग्रहाः दशमैकादशवित्त-केन्द्रत्रिकोणस्थाने गतास्तदा विक्रयकार्यः शुभो भवति। श्लोकेऽस्मिन् कुम्भलग्नं वर्जयित्वा शेषलग्नेषु शुभमित्युक्तमत्रेति। आचार्यरामदैवज्ञमहोदयोऽत्र स्थानद्वयं (एकादशद्वितीयौ) न स्वीकृतवान्। विक्रयमुहूर्त्ते मतान्तरमिदमत्र वचनं वर्तते। विपणिमुहूर्त्तेऽपि मतान्तरं दृश्यते। पीयूषधाराटीकायां स्थापितविपणिमुहूर्त्तसम्बन्धिवचने मतान्तरं स्पष्टरूपेण प्राप्यते। आचार्यरामदैवज्ञ-कृतमुहूर्त्तचिन्तामणौ विपणिमुहूर्त्तस्य यानि लग्नानि प्रतिपादितानि सन्ति तेभ्यः भिन्नमेव प्रतिपादितं वर्तते पीयूषधाराटीकायामाचार्यगोविन्ददैवज्ञेन। स्वकृतटीकायां गोविन्दमहोदयेन विपणिमुहूर्त्तस्य कृते रत्नामालाग्रन्थस्य उद्धरणं प्रदत्तं वर्तते।

उक्तं रत्नमालायाम्
कुम्भराशिमपहाय साधुषु द्रव्यकर्मभवमूर्तिवर्तिषु।
अव्ययेष्वशुभदायिषूद्गमे भार्गवे विपणिरिन्दुसंयुते॥

अत्रोक्तं वर्तते यच्चेत् शुभग्रहाः कुम्भराशिं वर्जयित्वा धनकर्मभवमूर्तिवर्तिषु (द्वितीयदशमैकादशलग्नस्थानेषु) स्थिताः स्युस्तदा विपणिकार्यः कर्तव्यः। यदि अशुभग्रहाः व्ययस्थानं परित्यज्य शेषेषु स्थानेषु गताः स्युस्तथा च लग्नस्थाने भार्गवेन्दू संयुतौ भवेतां तदा विपणिकार्यः शुभः ज्ञेयः। आचार्यगोविन्दमहोदयेन स्वरचितपीयूषधाराटीकायां शुभाशुभग्रहाणां स्थानेषु मतान्तरं स्पष्टरूपेण वर्णितं वर्तते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संज्ञा	नक्षत्राणि
मित्र	मृगशिरा, रेवती, चित्रा, अनुराधा
ध्रुव	उत्तराफाल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा, रोहिणी
क्षिप	हस्त, अश्विनी, पुष्य

बोधप्रश्नाः

१. 'क्रयः' इति पदस्यार्थः कः?

२. 'विक्रयः' इति पदस्यार्थः कः?

३. क्रयमुहूर्ते कति नक्षत्राणि भवन्ति?

४. यदि क्रयमुहूर्ते विक्रयं करोति तदा तस्य किं फलं भवति?

५. यदि विक्रयमुहूर्ते क्रयं करोति तदा तस्य किं फलं भवति?

६. विक्रयमुहूर्ते कति नक्षत्राणि आगच्छन्ति?

७. कति शुभग्रहाः भवन्ति?

८. कुम्भलग्नं स्वीकृतं वर्तते न वा विक्रयमुहूर्ते ?

९. अशुभग्रहाः केषु स्थानेषु शुभाः भवन्ति?

१०. रिक्तातिथियो भवन्ति।

११. विपणिमुहूर्ते कति नक्षत्राणि भवन्ति?

५.५ अश्वहस्तिक्रयविक्रयमुहूर्ताः

आचार्यरामदैवज्ञेन अश्वहस्तिक्रयविक्रयमुहूर्ताः प्रतिपादिताः सन्ति मुहूर्तचिन्तामणौ। प्राचीनकाले जनाः अश्वहस्तिक्रयविक्रयं कुर्वन्ति स्म। तस्मिन् कालेऽपि अश्वहस्तिक्रयविक्रयस्य कृते मुहूर्तस्यावश्यकता भवति स्म। यदि जनाः मुहूर्ते अश्वहस्तिक्रयविक्रयं कुर्वन्ति तदा तत् शुभं भवति। पुरा राजकीयकर्मणि राजसेवायां नियोक्तुम् अश्वहस्तिक्रयविक्रयः भवति स्म। मुहूर्तं विना कोऽपि अश्वहस्तिक्रयविक्रयं न कर्तुं शक्नोति स्म। आधुनिककालेऽपि अश्वहस्तिस्थाने मोटरयानस्य (गाडी इति हिन्दीभाषायाम्) क्रयविक्रयः दृश्यते। अद्यतनकाले चतुश्चक्रिकायानस्य इत्यादीनां क्रयविक्रयणार्थं जनाः मुहूर्तं पृच्छन्ति। यथोक्तं मुहूर्तचिन्तामणौ -

क्षिप्रान्त्यवस्विन्दुमरुज्जलेशादित्येष्वरिक्तारदिने प्रशस्तम्।
स्याद्वाजिकृत्यं त्वथ हस्तिकार्यं कुर्वान्मृदुक्षिप्रचरेषु विद्वन्॥

अन्वयः - विद्वन्। क्षिप्रान्त्यवस्विन्दुमरुज्जलेशादित्येष्वरिक्तारदिने प्रशस्तं स्यात्, वाजिकृत्यं त्वथ मृदुक्षिप्रचरेषु हस्तिकार्यं कुर्यात्।

पदच्छेदः - विद्वन्। क्षिप्र-अन्त्य-वसु-इन्दु-मरुत्-जलेश-आदित्येषु, अरिक्ता, आर, दिने, प्रशस्तम्। स्यात्, वाजि-कृत्यम्, तु, अथ, हस्ति-कार्यम्, कुर्यात्, मृदु-क्षिप्र-चरेषु।

प्रतिपदार्थः - विद्वन् = बुधः। क्षिप्रसंज्ञकनक्षत्राणि = (हस्त-अश्विनी-पुष्यं नक्षत्राणि)। अन्त्यः = रेवती। वसुः = धनिष्ठा। इन्दुः-मृगशिरा। मरुत्-स्वाती। जलेश=शततारा (शतभिषा),

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आदित्यः=पुनर्वसुः। अरिक्ताः = रिक्तातिथिभिः (४/९/१४) रहिताः। आरः = भौमवासरः, दिने = दिवसे। प्रशस्तम् = शुभम्। स्यात् = कुर्यात्। वाजिकृत्यम् = अश्वसम्बन्धिक्रयविक्रयादि-कृत्यम्। तु = तदा। अथ = अनन्तरम्। हस्तिकार्यम् = हस्तिसम्बन्धिक्रयविक्रयकार्यम्। कुर्यात् = भवेत्। मृदुसंज्ञकानि = (मृगशिरा-रेवती-चित्रा- अनुराधानक्षत्राणि) क्षिप्रसंज्ञकानि = (हस्त-अश्विनी-पुष्यनक्षत्राणि)। चरसंज्ञकानि = स्वाती पुनर्वसु-श्रवण-धनिष्ठा- शतभिषक्-नक्षत्राणि)। एतेषु भेषु हस्तिसम्बन्धिक्रयविक्रयकृत्यं कार्यम्।

भावार्थः - श्लोकेऽस्मिन् आचार्येण अश्वहस्तिक्रयविक्रयमुहूर्त्ते यानि स्वीकृतानि नक्षत्राणि तानि अत्र प्रतिपादितानि सन्ति। क्षिप्रसंज्ञकानि हस्त-अश्विनी-पुष्यनक्षत्राणि भवन्ति। रेवती-धनिष्ठा-मृगशिरा-स्वाती-शतभिषा-पुनर्वसु-हस्त-अश्विनी-पुष्यनक्षत्रेषु अश्वक्रयविक्रयकृते सति कल्याणकरो भवति। अत्र तिथीनामपि चर्चा कृता वर्तते। आचार्येण रिक्तातिथिं वर्जयित्वा शेषाः तिथयः स्वीकृताः सन्ति। शेषासु तिथिषु प्रतिपदा-द्वितीया-तृतीया-पञ्चमी-षष्ठी-सप्तमी-अष्टमी-दशमी-एकादशी-द्वादशी-त्रयोदशी-पूर्णिमा- अमावस्यातिथयः आगच्छन्ति। एतासु तिथिषु यदि अश्वक्रयविक्रयकृत्यं भवेत् तदा शुभदायकं भवति। अत्र मंगलवारं परित्यज्य शेषेषु वारेषु रवि-सोम-बुध-गुरु-शुक्र-शनिषु अश्वक्रयविक्रयकृते सति शुभप्रदायकं भवति। आचार्येण अत्र केवलं अश्वानां क्रयविक्रयणमेव नोक्तं अपितु अश्वानां शिक्षा, अश्वानां पालनपोषणादिकार्याणि अपि कथितनक्षत्रेषु-वारेषु-तिथिषु कल्याणप्रदानि भवन्ति।

आचार्यमहोदयेनात्र हस्तिक्रयविक्रयस्य नक्षत्राणां नामानि प्रतिपादितानि सन्ति। मृगशिरा-रेवती-चित्रा-अनुराधा-हस्त-अश्विनी-पुष्य-स्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषा इत्येतानि नक्षत्राणि हस्तिक्रयविक्रयमुहूर्त्ते निगदितानि सन्ति। मृगशिरा-रेवती-चित्रा-अनुराधानक्षत्राणि मृदुसंज्ञकानि भवन्ति। क्षिप्रसंज्ञके हस्त-अश्विनि-पुष्यनक्षत्राणि कथितानि सन्ति। चरसंज्ञके तु स्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषानक्षत्राणि भवन्ति। यदि स्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषा चेतेषां नक्षत्राणां चन्द्रवासरे योगो भवेत् तदा चरसंज्ञक इति कथितं वर्तते। मृगशिरा-रेवती-चित्रा-अनुराधानक्षत्राणां भृगुवासरे यदि संयोगो भवेत् तदा मृदुसंज्ञको भवति। हस्त-अश्विनी-पुष्यनक्षत्राणां योगश्चेद् स्यात् तदा क्षिप्रसंज्ञको भवति। एतेषु द्वादशनक्षत्रेषु हस्तिनः क्रयविक्रयो शुभदायको भवति। अत्र रिक्तातिथिं भौमवारञ्च वर्जयित्वा शेषेषु तिथिवारेषु हस्तिक्रयविक्रयः शुभो भवति। हस्तियात्रा तस्य नगरप्रवेश इत्यादि कार्याण्यापि एतेषु मुहूर्त्तेषु शस्तानि भवन्ति। अत्र अमावस्या पूर्णिमा च तिथ्योरनयोरपि हस्तिक्रयविक्रयः शुभः कथितो वर्तते। पक्षद्वयं भवति एकस्मिन् मासे। कृष्णपक्षः शुक्लपक्षश्चेति। एकस्मिन् पक्षे पञ्चदशतिथयः भवन्ति। कृष्णपक्षस्य त्रिंशद्दिनाङ्कं अमावस्या तथा च शुक्लपक्षस्य पञ्चदशदिनाङ्कं पूर्णिमा इति पदेन व्यवह्रयते।

अश्वानां क्रयविक्रयस्य मुहूर्त्तचक्रम्

नक्षत्राणि	तिथयः	वासराः
हस्तः, अश्विनी,	प्रतिपदा, द्वितीया,	सोमवासरः
पुष्यम्, रेवती,	तृतीया, पञ्चमी,	बुधवासरः
धनिष्ठा, मृगशिरा,	षष्ठी, सप्तमी,	गुरुवासरः
स्वाती, शतभिषा,	अष्टमी, दशमी,	शुक्रवासरः
पुनर्वसु	एकादशी, द्वादशी,	रविवासरः
	त्रयोदशी, पूर्णिमा,	शनिवासरः
	अमावस्या	

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हस्तीनां क्रयविक्रयस्य मुहूर्त्तचक्रम्

नक्षत्राणि	तिथयः	वासराः
मृगशिरा, रेवती	प्रतिपदा, द्वितीया	सोमवासरः
चित्रा, अनुराधा	तृतीया, पञ्चमी	बुधवासरः
हस्तः, अश्विनी	षष्ठी, सप्तमी	गुरुवासरः
पुष्यम्, स्वाती	अष्टमी, दशमी	शुक्रवासरः
पुनर्वसुः, श्रवणः	एकादशी, द्वादशी	रविवासरः
धनिष्ठा, शतभिषा	त्रयोदशी, पूर्णिमा अमावस्या	शनिवासरः

५.५.१ अश्वचक्र-हस्त्यङ्कुशारोपण-अश्वगजारोहणचक्रम्

अत्र पीयूषधाराटीकायां आचार्यगोविन्ददैवज्ञेन अश्वचक्र-हस्त्यङ्कुशारोपण-अश्वगजारोहणचक्रं अनेन प्रकारेण प्रतिपादितं वर्तते। दैवज्ञमनोहरनामकग्रन्थेऽश्वचक्रविषये निरूपितं वर्तते। यथा –

अश्वाकारं लिखेच्चक्रं साभिजिद्भानि विन्यसेत्।
स्कन्धे च सूर्यभात् पञ्च पृष्ठे च दशभानि च॥

पुच्छे द्वे स्थापयेत्प्राज्ञश्चतुष्पादे चतुष्टयम्।
उदरे विन्यसेत्पञ्च मुखे द्वे तुरगस्य च॥

अर्थलाभो मुखे सम्यग्वाजी नश्यति चोदरे।
चरणस्थे रणे भङ्गः पुच्छे पत्नी विनश्यति॥

अर्थसिद्धिर्भवेत्पृष्ठे स्कन्धे लक्ष्मीपतिर्भवेत्॥

अश्वचक्रं अश्वाकारं भवति। अश्वचक्रं सप्तविंशतिनक्षत्रेषु, अत्र अभिजिन्नक्षत्रं नीत्वा अष्टविंशतिनक्षत्रेषु विभक्तं वर्तते। चक्रमिदं सूर्यनक्षत्रात् ज्ञानं क्रियते। अश्वस्य स्कन्धे सूर्यनक्षत्रात् पञ्चनक्षत्राणि, पृष्ठे दशनक्षत्राणि, पुच्छे द्वे, चतुष्पादे चत्वारि नक्षत्राणि, उदरे पञ्चनक्षत्राणि, मुखे द्वे, चेत्येतानि नक्षत्राणि भवन्ति। सूर्यनक्षत्रात् चन्द्रनक्षत्रं यावत् यावन्ति नक्षत्राणि व्यतीतानि सन्ति तेषां नक्षत्राणां गणना करणीया। यदि चन्द्रनक्षत्रं अश्वस्य मुखे भवेत् तदा अर्थलाभः, उदरे सम्यग्वाजिनाशः, चरणस्थे रणे भङ्गः, पुच्छे पत्नीविनाशः, पृष्ठेऽर्थसिद्धिः स्कन्धे च लक्ष्मीपतिः ज्ञेयः।

अश्वचक्रम्

स्कन्धः	पृष्ठः	पुच्छः	चतुष्पाद	उदरः	मुखम्	अंगानि
5	10	2	4	5	2	28 नक्षत्राणि
लक्ष्मीपतिः	अर्थसिद्धिः	स्त्री हानिः	भङ्गः	नाशः	अर्थलाभः	फलम्
15 लाभः			11 हानिः		2 लाभः	

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हस्त्याङ्कुशार्पणमुहूर्त्तस्य विषयेऽऽचार्यरामदैवज्ञेन स्वरचितमुहूर्त्तचिन्तामणि-नामकग्रन्थे न प्रतिपादितं वर्तते। अस्मिन् विषये पीयूषधाराटीकारेण व्यवहारोच्चयस्य ग्रन्थस्य हस्त्यङ्कुशार्पणमुहूर्त्तः प्रतिपादितो वर्तते।

शुभतारे शुभे लग्ने शुभांशे शोभने तिथौ।
अङ्कुशाः करिणां योज्याः शनिलग्ने शनेर्दिने॥

यदि शुभग्रहाः शुभलग्ने गतास्तथा च शुभांशे अर्थात् शुभग्रहस्य नवांशे भवेयुस्तदा हस्त्यङ्कुशारोपणं शुभं भवति। अत्र रिक्तातिथिं (४/९/९४) वर्जयित्वा प्रतिपदा-द्वितीया-तृतीया-पञ्चमी-षष्ठी-सप्तमी-अष्टमी-दशमी-एकादशी-द्वादशी-त्रयोदशी-पूर्णिमासु तिथिषु तथा च शनौ लग्ने स्थिते शनिवासरे वा भवेत् तदा हस्त्यङ्कुशारोपणं शुभं कथितं व्यवहारोच्चयग्रन्थे।

अश्वगजारोपणविषये आचार्यगोविन्ददैवज्ञेन पीयूषधाराटीकायां निरूपणं कृतं वर्तते। ये जनाः अश्वारोहरणं गजारोहणं वा कुर्वन्ति तेषां जनानां कृते अश्वारोहणं गजारोहणं वेति मुहूर्त्तः प्रतिपादितो वर्तते। (आरोहणमितिपदस्यार्थः आरोहित होना, चढ़ना इति हिन्दीभाषायाम्)। अश्वगजारोहणमुहूर्त्तः व्यवहारोच्चयग्रन्थे कथितो वर्तते, यथा -

पौष्णाश्विनीवरुणमारुतशीतरश्मिचित्रादितिश्रवणपाणिसुरेज्यवित्तैः।
वारेषु जीवशशिसूर्यसितेन्दुजानामारोहणं गजतुरङ्गरथेषु शस्तम्॥

अत्र अश्वगजारोहणमुहूर्त्ते यानि नक्षत्राणि भवन्ति तेषां नक्षत्राणां नामानि प्रतिपादितानि सन्ति। रेवती अश्विनी शतभिषा स्वाती मृगशिरा चित्रा पुनर्वसुः श्रवणश्चैतेषु नक्षत्रेषु अश्वगजाद्यारोहरणं शुभं भवति। श्लोकेऽस्मिन् वाराणां अपि चर्चा विद्यते। बृहस्पतिः चन्द्रमा सूर्यः शुक्रः बुधश्चैतेषु वारेषु अश्वगजारोहणमुहूर्त्तस्य वर्णितनक्षत्राणि चेत् प्राप्तानि भवेयुस्तदा गजतुरङ्गरथेषु आरोहणं शुभदायकं भवति। ज्योतिर्निबन्धोक्तम् अश्वारोहणचक्रमत्र प्रतिपाद्यते।

चक्रेऽश्वः शिरपञ्चके सुखकरः पृष्ठे च दिग्लाभदः।
पुच्छे द्वे गृहिणीविनाशनकरः पादेऽब्धिभङ्गो भवेत्॥
नाशं चोदरपञ्चभिश्च कुरुते चाऽऽस्ये द्विलाभे भवेद्।
गेहे चायनरोहणे फलमिदं सूर्यर्क्षतो वा क्रमात्॥

यद्यत्र सूर्यर्क्षतः चन्द्रनक्षत्रं यावदन्तरं कृत्वा यदि तात्कालिकनक्षत्रं शिरपञ्चनक्षत्रेषु अन्यतमः तर्हि सुखकरः, पृष्ठदशनक्षत्रेषु लाभदः, पुच्छद्वयोर्नक्षत्रयोः गृहिणीविनाशकरः, चतुष्पादनक्षत्रेषु भङ्गः उदरपञ्चनक्षत्रेषु विनाशः मुखद्वयोर्नक्षत्रयोश्च अश्वरथस्यारोहणे लाभो भवति।

अश्वारोहणचक्रम्

शिरः	पृष्ठः	पुच्छः	पादः	उदरः	मुखम्	अंगानि
5	10	2	4	5	2	नक्षत्राणि
सुखम्	लाभः	स्त्रीहानिः	भङ्गः	विनाशः	लाभः	फलम्

५.५.२ मतान्तरवचनानि

आचार्यरामदैवज्ञेन अश्वहस्तिक्रयविक्रयमुहूर्त्ते यानि नक्षत्राणि प्रतिपादितानि सन्ति तेषां नक्षत्राणां मतान्तरं दृश्यते। मुहूर्त्तचिन्तामणौ कथितानि नक्षत्राणि, तेषां नक्षत्राणां रत्नमालायां वर्णितनक्षत्रेषु मतान्तरं प्राप्नोति। रत्नमालायामाह -

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुष्यश्रविष्ठाश्विनिसौम्यभेषु पौष्णानिलादित्यकराव्ययेषु।
सर्वासवर्क्षेषु बुधैः स्मृतानि सर्वाणि कार्याणि तुरङ्गमाणाम्॥

अत्र पुष्यम् धनिष्ठा अश्विनी मृगशिराः रेवती स्वाती पुनर्वसुः हस्तमित्येतेषु नक्षत्रेषु अश्वक्रयविक्रयो शुभदायको भवति। विद्वद्भिर्बुधैः वा सर्वाणि कार्याणि तुरङ्गमाणां स्मृतानि सन्ति। तथाऽरिक्तारदिने रिक्ताश्चतुर्थीनवमीचतुद्रश्यः आरो भौमः। 'आरो वक्रः क्रूरदृक् चावनेयः' वराहमिहिरस्य उक्तिरियं वर्तते। यदि रिक्ताभौमान् वर्जयित्वा अन्यवारेषु अन्यतिथिषु च वाजिकृत्यं अर्थात् अश्वसम्बन्धिक्रयविक्रयादिकार्यं शुभं भवति। हस्तिक्रयविक्रयमुहूर्त्ते द्वादशनक्षत्राणि पठितानि सन्ति मुहूर्त्तचिन्तामणेः पीयूषधाराटीकायाम्। मृदुनक्षत्राणि चित्रानुराधामृगरेवत्यः, क्षिप्राणि अश्विनीपुष्यहस्ताः, चराणि श्रवण-धनिष्ठाशततारकापुनर्वसुस्वात्यः इत्येतेषु द्वादशनक्षत्रेषु हस्तिसम्बन्धिक्रयविक्रयादिकार्यं शुभदायकं भवति। आचार्यवसिष्ठमहोदयेनापि अश्वहस्तिक्रयविक्रयस्य मुहूर्त्तः निरूपितो वर्तते।

हस्तत्रये सौम्यहरित्रये च पौष्णद्वये पुष्यपुनर्वसौ च।
मैत्रेऽपि सर्वाण्यपि कुञ्जराणां कर्माणि शस्तान्यखिलानि यानि॥

अत्र कुञ्जराणां क्रयविक्रयमुहूर्त्तस्य कृते एतानि नक्षत्राणि प्रतिपादितानि सन्ति। तेषां हस्तिक्रयविक्रयमुहूर्त्तस्य नक्षत्राणां क्रमेण प्रतिपादितं वर्तते आचार्यवसिष्ठेन। हस्ततः त्रीणि नक्षत्राणि (हस्तचित्रास्वात्यः), सौम्योऽर्थात् मृगशिरा, हरित्रयोऽर्थात् श्रवणनक्षत्रतः त्रीणि नक्षत्राणि (श्रवणधनिष्ठाशतभिषजः), पौष्णद्वये अर्थात् पौष्णतः द्वे नक्षत्रे (रेवत्यश्विन्यौ) पुष्यपुनर्वसू, मैत्रमर्थात् अनुराधा इत्येतेषु नक्षत्रेषु कुञ्जराणां यान्यखिलानि सर्वाणि कर्माणि शस्तानि भवन्ति।

हस्तिक्रयविक्रयसम्बन्धिशुभनक्षत्राणि आचार्यवसिष्ठेन

शुभ नक्षत्राणि	हस्तः-चित्रा-स्वातिः-मृगशिरा-श्रवणः-धनिष्ठा-शतभिषक्-रेवती-अश्विनी-पुष्यम्-पुनर्वसुः-अनुराधा

बोधप्रश्नाः

१२. अश्वक्रयविक्रयमुहूर्त्तनक्षत्रेषु स्वातीनक्षत्रस्य गणना भवति न वा?

१३. वाजिकृत्यम् इत्यस्य कः अर्थः?

१४. मृदुसंज्ञकनक्षत्राणि कानि सन्ति?

१५. अश्वचक्रे सूर्यनक्षत्रात् स्कन्धे कति नक्षत्राणि स्थाप्यानि?

१६. अश्वारोहणचक्रे पुच्छे नक्षत्रस्य स्थितिवशात् किं फलम्?

१७. श्रविष्ठा इति कस्य नक्षत्रस्य अपर संज्ञा?

१८. काः तिथयः अश्वकृत्ये अुशभदाः?

५.६ भूषाघटनादिमुहूर्त्तः

आचार्यरामदैवज्ञेन भूषाघटनादिमुहूर्त्तः प्रतिपादितोऽस्ति स्वरचितमुहूर्त्तचिन्तामणिग्रन्थे। भूषा इति पदस्यार्थः आभूषणं भवति। घटनमिति पदस्यार्थः निर्माणमितिकथितमाचार्येण। भूषणस्य निर्माणविधिः प्राचीनकालाद् भवति। भूषणस्यावश्यकता केवलं स्त्रीणां कृते भवति स्म। सम्प्रति भूषणं पुरुषजनाः अपि धारयन्ति। अलंकारं विना स्त्रियः न शोभन्ते अर्थात् स्त्रीणां

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अलंकाराः आभूषणादयः भवन्ति। ताभि आभूषणादिभिः स्त्रियः शोभायमाणाः भवन्ति। प्राचीनकाले रुप्य-मिश्रताम्रसुवर्णादिनां आभूषणं स्त्रियः धारयन्ति स्म। घनरहितस्त्रियः मृद्ताम्रस्य आभूषणं धारयन्ति स्म। तस्मिन्काले घनयुक्ताः या स्त्रियः भवन्ति ताः सुवर्णादीनामाभूषणं धारणं कुर्वन्ति स्म। एतेषां आभूषणानां निर्माणस्य कृते मुहूर्त्तस्यावश्यकता भवति। अत्र मुहूर्त्तं प्रतिपादितवान् आचार्यरामदैवज्ञः।

स्याद् भूषाघटनं त्रिपुष्करचरक्षिप्रध्रुवे रत्नयुक्
तत्तीक्ष्णोग्रविहीनभे रविकुजे मेषालिसिंहे तनौ।
तन्मुक्तासहितं चरध्रुवमृदुक्षिप्रे शुभे सत्तनौ
तीक्ष्णोग्राश्विमृगे द्विदैवदहने शस्त्रं शुभं घट्टितम्॥

अन्वयः – त्रिपुष्करचरक्षिप्रध्रुवे भूषाघटनं स्यात्। भूषाघटनं रत्नयुक् तत्तीक्ष्णोग्रविहीनभे रविकुजे मेषालिसिंहे तनौ (कार्यम्)। चरध्रुवमृदुक्षिप्रे तन्मुक्तासहितं शुभं (भवति)। तीक्ष्णोग्राश्विमृगे द्विदैवदहने घट्टितं शस्त्रं शुभं (भवति)।

पदच्छेदः – त्रिपुष्करः। चरः। क्षिप्रः। ध्रुवे। भूषा। घटनम्। स्यात्। भूषा। घटनं। रत्न। युक्। तत्। तीक्ष्णः-उग्र-विहितम्। भे। रवि-कुजे। मेष-अलि-सिंहे। तनौ। चर-ध्रुव-मृदु-क्षिप्रे। तत्। मुक्ता। सहितम्। शुभम्। तीक्ष्ण-उग्र-अश्व-मृगे। द्विदैव-दहने। घट्टितम्। शस्त्रम्। शुभम्।

प्रतिपदार्थः – त्रिपुष्करः = त्रिपुष्करलक्षणम्। चरः = चरसंज्ञकनक्षत्राणि (स्वाती-पुनर्वसु-शतभिषा-श्रवणाः)। क्षिप्रः = क्षिप्रसंज्ञकनक्षत्राणि (हस्त-अश्विनी-पुष्यानि)। ध्रुवः = ध्रुवसंज्ञकानि (उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रोहिण्यः)। भूषा = आभूषणम्। घटनम् = निर्माणम्। स्यात् = कुर्यात्। भूषा = आभूषणम्। घटनम् = निर्माणम्। रत्नम् = माणिक्यमुक्तादयः। युक् = सहितम्। तत्। तीक्ष्णसंज्ञकानि (मूलज्येष्ठार्द्राश्लेषानक्षत्राणि)। उग्रसंज्ञकानि पूर्वाफाल्गुनीपूर्वाषाढपूर्वा-भाद्रभरणीमघानक्षत्राणि। विहितम् = रहितम्। भे = शेषनक्षत्रेषु। रविः = सूर्यः। कुजे = भौमे। मेषः = मेषराशिः। अलिः = वृश्चिकः। सिंहे = सिंहराशौ। तनौ = लग्ने। चरः = चरसंज्ञकानि (स्वातीश्रवणशतभिषाघनिष्ठापुनर्वसवः)। ध्रुवः = ध्रुवसंज्ञकानि (उत्तराचित्राऽनुराधाः)। क्षिप्रः = क्षिप्रसंज्ञकानि (हस्ताश्विनीपुष्यानि)। तत् = भूषाघटनं मुक्ता-मौक्तिकम्। सहितम् = संयुक्तम्। शुभम् = अतिशस्त्रम्। तीक्ष्णः = तीक्ष्णसंज्ञकानि (मूलज्येष्ठार्द्राश्लेषानक्षत्राणि)। उग्रः = उग्रसंज्ञकानि (पूर्वाफाल्गुनीपूर्वाषाढपूर्वाभाद्रपदभरणीमघाः)। अश्विः = अश्विनी। मृगे = मृगशिरा। द्विदैवः = विशाखा। दहने = कृत्तिकायाम्। घट्टितम् = निर्मितम्। शस्त्रम् = शस्त्रप्रसिद्धम्। शुभम् = शस्त्रम्।

भावार्थः – अत्र द्वितीयसप्तमीद्वादशीतिथयः, शनिभौमरविवासराः, विशाखा-उत्तराफाल्गुनी-पूर्वाभाद्रपदा-पुनर्वसु-कृत्तिका-उत्तराफाल्गुन्यायुक्तः स्यात् तदा त्रिपुष्करयोगो भवति। आचार्यरामदैवज्ञेन भूषाघटनस्य मुहूर्त्ते यानि नक्षत्राणि कथितानि सन्ति तेषां नक्षत्राणां नामानि अत्र वर्णितानि सन्ति। चरसंज्ञकानि स्वातीपुनर्वसुश्रवणघनिष्ठानक्षत्राणि, हस्ताश्विनीपुष्यनक्षत्राणि क्षिप्रसंज्ञकानि ध्रुवसंज्ञकानि उत्तरफाल्गुन्युत्तराषाढोत्तराभाद्रपदरोहिणीनक्षत्राणि च। एतेषु सर्वेषु नक्षत्रेषु त्रिपुष्करयोगे चाभूषणानां निर्माणं शुभं भवति। अत्र रत्नजटिताभूषणानां निर्माणं तीक्ष्णसंज्ञकानि उग्रसंज्ञकानि वर्जयित्वा शेषेषु नक्षत्रेषु शुभं भवति। शेषनक्षत्राणां नामानि कथितानि सन्ति मुहूर्त्तचिन्तामणौ। अश्विनी, कृत्तिका, रोहिणी, मृगशिरा, पुनर्वसुः, पुष्यम्, उत्तराफाल्गुनी, हस्तः, चित्रा, स्वाती, विशाखा, अनुराधा, उत्तराषाढा, श्रवणः धनिष्ठा, शतभिषा, उत्तराभाद्रपदा रेवती इत्येतेष्वष्टादशनक्षत्रेषु, सूर्यभौमवारयोः वृश्चिकमेषसिंहलग्नेषु च रत्नजटिताभूषणानां (अंगूठी, नाककील, कर्णाभूषण हारादि इति हिन्दीभाषायाम्) निर्माणं शुभं भवति। अत्र मुक्ताजटिताभूषणानां निर्माणस्य विषये मुहूर्त्तः प्रतिपादितः रामदैवज्ञेन। चरसंज्ञकानि (स्वातीपुनर्वसुश्रवणधनिष्ठाशतभिषाः), ध्रुवसंज्ञकानि (उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपद्रोहिण्यः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्रसंज्ञकानि (हस्ताश्विनीपुष्यानि) च। एतेषु षोडशनक्षत्रेषु, शुभवासरेषु (चन्द्रबुधबृहस्पतिशुक्रेषु) शुभलग्नेषु च (2/3/4/6/7/9/12) मुक्ताजटिताभूषणानां निर्माणं शुभमखिलं भवति अत्र रामदैवज्ञेन तिथीनां चर्चा भूषाघटनादिमुहूर्त्ते न कृता वर्तते। रत्नानां नामानि मुहूर्त्तचिन्तामणेः गोचरप्रकरणे प्रतिपादितानि सन्ति। यथा -

माणिक्यमुक्ताफलविद्रुमाणि गारुत्मकं पुष्यकवज्रनीलम्।
गोमेदवैदूर्यकमर्कतः स्युः रत्नान्यतो ज्ञस्य मुदे सुवर्णम्॥

अत्र सूर्यस्य माणिक्यं एवं चन्द्रस्य मुक्ताफलम्, भौमस्य विद्रुमं बुधस्य गारुत्मकं गुरुडपाचिः, गुरोः पुष्यकं पुष्परागः, शुक्रस्य वर्जं शनेर्नीलम्, राहोर्गोमेदं केतोः वैदूर्यञ्चेत्येवमर्कादिनां ग्रहाणां रत्नानि भवन्ति।

कस्मिन् मुहूर्त्ते शस्त्राणां निर्माणं कर्तव्यम्? एतस्य मुहूर्त्तस्य विषयेऽत्र प्रतिपादितं रामदैवज्ञेन। तीक्ष्णसंज्ञकः (मूलम्-ज्येष्ठा-आर्द्रा-आश्लेषा), उग्रसंज्ञकः (पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा-भरणी-मघा), अश्विनी-मृगशिरा-विशाखा कृत्तिका च। एषु त्रयोदशनक्षत्रेषु शस्त्राणां (पिस्तौल, गडासी, त्रिशूल, भाला इति हिन्दीभाषायाम्) निर्माणं शुभप्रदायकं भवति।

रत्नजटिताभूषणमुहूर्त्तचक्रम्

नक्षत्राणि	वासरः	लग्नानि
अश्विनी, कृत्तिका, रोहिणी, मृगशिरा,	रविवासरः	मेषः
पुनर्वसुः, पुष्यम्, उत्तराफाल्गुनी, हस्तः,	भौमवासरः	वृश्चिकः
चित्रा, स्वाती, विशाखा, अनुराधा,		सिंहः
उत्तराषाढा, श्रवणः, धनिष्ठा, शतभिषा,		
उत्तराभाद्रपदा, रेवती		

मुक्ताजटिताभूषणनिर्माणमुहूर्त्तचक्रम्

नक्षत्राणि	वासरः	लग्नानि
स्वाती, पुनर्वसुः, श्रवणः, धनिष्ठा,	चन्द्रवासरः	2, 3, 4, 6,
शतभिषा, उत्तराफाल्गुनी, उत्तराषाढा,	बुधवासरः	7, 9, 12
उत्तराभाद्रपदा, रोहिणी, मृगशिरा, रेवती,	बृहस्पतिवासरः	
चित्रा, अनुराधा, हस्तः, अश्विनी, पुष्यम्	शुक्रवासरः	

५.६.१ वसिष्ठादि-आचार्याणां मतानि

आचार्यगोविन्ददैवज्ञेन भूषाघटनस्य मुहूर्त्ते पीयूषधाराटीकायां वसिष्ठस्य मतं प्रतिपादितं वर्तते। यथा -

क्षिप्रचलाचलऋक्षे रिक्तामावर्जितेषु दिवसेषु।
निखिलेषु वासरेष्वपि त्रिपुष्करे भूषणं कार्यम्॥

अत्र क्षिप्रचरध्रुवनक्षत्रेषु, रिक्तामा अर्थात् रिक्तातिथयः (चतुर्थीनवमीचतुर्दश्यः) अमा अमावस्या, इमास्तिथीः वर्जयित्वा शेषासु तिथिषु, निखिलेषु वारेषु त्रिपुष्करयोगे चाभूषणानां निर्माणं शुभप्रदायकं भवति। रत्नघटिताभूषणानां निर्माणविषये मुहूर्त्तं प्रतिपादितवानाचार्यवसिष्ठोऽत्र।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थिरसाधारणचरभे लघुमैत्रेष्वर्ककुजवारे।
तेषामेव विलग्ने माणिक्यमयं विभूषणं कार्यम्॥

अत्र साधारणनक्षत्रमेव मिश्रसंज्ञकनक्षत्रं भवति। स्थिरमिश्रचरलघुमैत्रसंज्ञकनक्षत्रेषु, रविभौमवासरयोः मेषवृश्चिकसिंहलग्नेषु च रत्नजटितभूषाणां निर्माणं शुभं भवति। मुक्ताभूषणघटनस्य विषये पीयूषधाराटीकायामेकं वाक्यं प्राप्यते। अत्र "चन्द्रशुक्रयोर्वारि कर्कवृषतुलालग्नेषु कार्यमित्यपि विशेषो ध्येयः"। वाक्येऽस्मिन् कथितं वर्तते यत् चन्द्रशुक्रयोर्वारि कर्कवृषतुलालग्नेषु मुक्ताभूषणानां निर्माणं शुभदायकं भवति। तदुक्तं वसिष्ठेन –

क्षिप्रमृदुध्रुवचरभे शशिसितयोर्वासरेषु तुलालग्ने।
मुक्ताफलरजतमयं भूषणमखिलं सवज्रकं कार्यम्॥

क्षिप्रमृदुध्रुवचरसंज्ञकनक्षत्रेषु, चन्द्रशुक्रयोर्वासरे कर्कवृषतुलालग्नेषु मुक्ताफलरजतमयं भूषणमखिलं सवज्रकं निर्माणं शुभप्रदायकं भवन्ति। ज्योतिःसागरनामकग्रन्थेऽपि शस्त्राणां निर्माणमुहूर्त्तः प्रतिपादितो वर्तते। यथोक्तम् –

कृत्तिकासु विशाखासु भौमार्कशनिवासरे।
तद्दिने घटितं शस्त्रं नृपाणां जयदायकम्॥

अत्र कृत्तिकानक्षत्रेषु विशाखानक्षत्रेषु भौमार्कशनिवासरेषु नृपाणां कृते शस्त्रनिर्माणं जयदायकं भवति। दीपिकानामकग्रन्थे खड्गादिनक्षत्राणां निर्माणसम्बन्धिमुहूर्त्तः कथितोऽस्ति।

मूलेन्दुपूर्वात्रययाम्यपित्र्यशक्राश्विसर्मानलशूलिनश्च।
खड्गादिसाधारणकर्म कुर्यात्तिथौ विलग्ने च शुभे शुभावहे॥

मूलमृगशिरापूर्वाफाल्गुनीपूर्वाषाढपूर्वाभाद्रपदभरणीमघाज्येष्ठाश्विनीश्लेषाकृत्तिकानक्षत्रेषु शुभतिथिषु, शुभलग्नेषु शुभवारेषु च खड्गादिशस्त्राणां निर्माणे सति फलं शुभदायकं भवति।

५.६.२ रौप्यसुवर्णपात्रे भोजनमुहूर्त्तः

आचार्यगोविन्ददैवज्ञकृतपीयूषधाराटीकायां रौप्यसुवर्णपात्रे भोजनमुहूर्त्तः प्रतिपादितो वर्तते। रौप्यमर्थात् रजतमिति हिन्दीभाषायाम् (चाँदी) भवति। रजतपात्रे सुवर्णपात्रे वा ये जनाः भोजनं कुर्वन्ति ते नीरोगिणो भवन्ति। तस्मिन् रौप्यसुवर्णपात्रे भोजनस्य कृते मुहूर्त्तोऽयं प्रतिपादितोऽस्त्याचार्यवसिष्ठेन। यथा –

लघुमैत्रध्रुवमृदुभे सितेन्दुबुधजीववारेषु।
हेमरजतादिभोजने भोजनमारोग्यममृतयोगेषु॥

अत्र लघुमैत्रध्रुवमृदुसंज्ञकनक्षत्रेषु सितेन्दुबुधजीववासरेषु अमृतयोगेषु च सुवर्णरजतपात्रे भोजने कृते सति आरोग्यदायकं फलं भवति। अमृतयोगानां वर्णनं शुभाशुभप्रकरणे विद्यते।

रौप्यसुवर्णपात्रे भोजनमुहूर्त्तचक्रम्

नक्षत्राणि	वासराः
उत्तराफाल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा,	शुक्रवारः
मृगशिरा, रेवती, चित्रा, अनुराधा, हस्तः,	चन्द्रवारः
अश्विनी, पुष्यम्, अभिजित्	बुधवारः
	गुरुवारः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५.७ मुद्रापातनवस्त्रक्षालनमुहूर्त्तः

मुद्रायाः पातनं मुद्रापातनमिति षष्ठीतत्पुरुषसमासयुक्तत्वात्। वस्त्राणां क्षालनं वस्त्रक्षालनमिति। पातनमिति पदस्यार्थः निर्माणं भवति (सिक्कों को बनाना इति हिन्द्याम्) वस्त्रक्षालनम् (कपड़ों को धुलाना इति हिन्दी भाषायाम्)। मुद्रायाः पातनं प्राचीनकालादेव भवति। प्राचीनकाले ताम्रलौहरजतसुवर्णादिधातूनां मुद्रापातनं भवति स्म। सम्पूर्णविश्वे यस्य राज्यस्य ये राजानः भवन्ति स्म ते नृपतयः स्वराज्ये स्वनाम्ना मुद्रापातनं कुर्वन्ति स्म। केचन नृपतयः सुवर्णस्य मुद्रापातनं रजतस्य मुद्रापातनं ताम्रस्य मुद्रानिर्माणञ्च कुर्वन्ति स्म। अद्यतनकालेऽपि मुद्रापातनं मिश्रितायस्कधातोः भवति। अत्र मुद्रापातनवस्त्रक्षालनमुहूर्त्तं विना न भवितुमर्हति। अतएवाचार्यरात्रदैवज्ञेन मुद्रापातनवस्त्रक्षालनमुहूर्त्तः प्रतिपादितोऽस्ति मुहूर्त्तचिन्तामणौ।

मुद्राणां पातनं सद्ध्रुवमृदुचरभक्षिप्रभैर्वीन्दुसौरे
घस्रे पूर्णाजयाख्ये न च गुरुभृगुजास्ते विलग्ने शुभैः स्यात्।
वस्त्राणां क्षालनं सद्वसुहयदिनकृत्पञ्चकादित्यपुष्ये
नो रिक्तापर्वषष्ठीपितृदिनरविजज्ञेषु कार्यं कदापि॥

पदच्छेदः – मुद्राणाम्। पातनम्। सद्। ध्रुवः। मृदुः। चरभः। क्षिप्रः। भैः। वीन्दुः। सौरे। घस्रे। पूर्णा जया। न। च। गुरुः। भृगुजास्ते। विलग्ने। शुभैः। स्यात्। वस्त्राणां।क्षालनम्। सद्। वसुः। हयः। दिनकृत्पञ्चकानि। आदित्यः। पुष्ये। नो। रिक्ता। पर्व षष्ठी। पितृदिनम्। रविजः। ज्ञेषु। कार्यं। कदापि।

अन्वयः – ध्रुवमृदुचरभक्षिप्रभैः मुद्राणां पातनं सद् वीन्दुसौरे पूर्णाजयाख्ये घस्रे गुरुभृगुजास्ते न शुभैः विलग्रे स्यात्। वसुहयदिनकृत्पञ्चकादित्यपुष्ये वस्त्राणां क्षालनं सत्। रिक्तापर्वषष्ठीपितृदिनरविजज्ञेषु कदापि नो कार्यम्।

प्रतिपदार्थः – ध्रुवसंज्ञकाः = उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपद्रोहिन्यः। मृदुसंज्ञकाः = मृगशिरा-रेवतीचित्नाऽनुराधाः। चरसंज्ञकाः = स्वातीपुनर्वसुश्रवणशतभिषघनिष्ठाः। क्षिप्रसंज्ञकाः = हस्ताश्विनीपुष्यानि। मुद्राणाम् = राजमुद्राङ्कितसुवर्णरूप्यादिनां, पातनम् = निष्पादनम्। सद् = शुभम्। वीन्दूसौरे = सोमशनिरहिते। पूर्णाः = पञ्चमीदशमीपूर्णिमाः। जयाः = तृतीयाष्टमीत्रयोदश्यः। घस्रे = दिने। गुरुभृगुजास्ते-गुरुशुक्रास्तकाले। न = नहि। शुभैः = शुभग्रहैः। विलग्ने = उदिते। स्यात् = भवेत्। वसुः = धनिष्ठाः। हयः = अश्विनी। दिनकृत्पञ्चकानि = हस्तचित्रास्वाती-विशाखानुराधाः। आदित्यः = पुनर्वसुः। पुष्ये = पुष्यनक्षत्रे। वस्त्राणाम् = वस्त्रप्रसिद्धानाम्। क्षालनम् = धावनम्। सत् = शस्तम्। रिक्ताः = चतुर्थीनवमीचतुद्रश्यः। पर्वाणि। पितृदिनम् = अमावस्या, रविजज्ञेषु = शनैश्चरबुधदिवसेषु। कदापि। नो = नहि। कार्यम् = करणीयम्।

भावार्थः – ध्रुवमृदुचरक्षिप्रनक्षत्रेषु, सोमशनिवारं परित्यज्य रविभौमबुधगुरुशुक्रवारेषु, पञ्चमीदशमीपूर्णिमातिथिषु, तृतीयषष्ठीत्रयोदशीतिथिषु, भद्रातिथिं वर्जयित्वा, गुरुशुक्रयोरस्तबाल्यवृद्धं परित्यज्य अन्यशुभकालस्य लग्ने शुभग्रहाश्चेत् स्थिताः स्युस्तेषु कालेषु राजमुद्राङ्कितसुवर्णरूप्यादिनिष्पादनं शुभदायकं भवति। वस्त्रक्षालनस्य नक्षत्राणि प्रतिपादितानि सन्ति आचार्यरामदैवज्ञेनात्र। धनिष्ठा-अश्विनी-हस्त-चित्रा-स्वाती-विशाखा-अनुराधा-पुनर्वसु-पुष्याणि। एतेषु नवनक्षत्रेषु वस्त्राणां धावनं शुभदायकं भवति। रिक्तातिथयश्चतुर्थीनवमीचतुद्रश्यः, पर्वाणि, षष्ठी, अमावस्या शनैश्चरबुधदिवसेषु कदापि वस्त्राणां धावनं नो कर्तव्यमिति। कस्यचित् आचार्यस्य मतं वर्तते यत् मंगलवासरेऽपि वस्त्रधावनं न कार्यम्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुद्रापातनमुहूर्त्तचक्रम्

नक्षत्राणि	तिथयः	वासराः
उत्तराफाल्गुनी, उत्तराषाढा,	पञ्चमी, दशमी	रविवासरः
उत्तराभाद्रपदा, रोहिणी, मृगशिरा,	पूर्णिमा, तृतीया	भौमवासरः
रेवती, चिना, अनुराधा, स्वाती,	अष्टमी	बुधवासरः
श्रवणः, पुनर्वसुः, धनिष्ठा, शतभिषा,	त्रयोदशी	गुरुवासरः
हस्तः, अश्विनी, पुष्यम्		शुक्रवासरः

५.७.१ गणेशदैवज्ञस्य मतम्

आचार्यगोविन्ददैवज्ञेन वस्त्राणां प्रक्षालनमुहूर्त्तविषये गणेशदैवज्ञस्य मतं प्रतिपादितं वर्तते पीयूषधाराटीकायाम्।

पौष्णादित्यादिपञ्चाश्विवसुषु च भवेद्वाससां क्षालनाद्यं,
हित्वा षष्ठीं च पूर्वाब्जसुतशनिदिनं श्राद्धघर्सं शुभं स्यात्।

रेवती पुनर्वसुपुष्याश्लेषामघापूर्वाफाल्गुन्यश्विनीधनिष्ठानक्षत्रेषु प्रतिपदां षष्ठीं च तिथिं पर्वमर्थात् अमा-पूर्णिमातिथी हित्वा बुधशनैश्चरवासरयोः श्राद्धदिने च वस्त्राणां धावनं शुभप्रदायकं भवति। अदितिः पुनर्वसुः आदिरादित्यः। क्वचिद् स्थाने भौमशनिवासरौ संक्रान्त्यादिकं निन्द्यं कथितं वर्तते आचार्यैः।

सारसमुच्चयनामकग्रन्थेऽपि मुद्राणां घटनमुहूर्त्तः प्रतिपादितोऽस्ति। उक्तञ्च सारसमुच्चये-

मृदुध्रुवक्षिप्रचरेषु भेषु योगे प्रशस्ते शनिचन्द्रवर्ज्ये
वारे तिथौ पूर्णजयाख्ययोश्च मुद्राप्रतिष्ठा शुभदा नराणाम्॥

अत्र मृदुसंज्ञकेषु (मृगशिरारेवतीचित्राऽनुराधानक्षत्रेषु), ध्रुवसंज्ञकेषु (उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदारोहिणीनक्षत्रेषु) क्षिप्रसंज्ञकेषु (हस्ताश्विनीपुष्यनक्षत्रेषु) चरसंज्ञकेषु (स्वातीपुनर्वसुश्रवणधनिष्ठाशतभिषनक्षत्रेषु) शनिचन्द्रवासरौ वर्जयित्वा शेषेषु वारेषु (सूर्यभौमबुधबृहस्पतिशुक्रवासरेषु) पूर्णाजयातिथिषु (पञ्चमीदशमीपूर्णिमातृतीया-अष्टमीत्रयोदशी-तिथिषु) नराणामर्थात् भूपतीनां मुद्राप्रतिष्ठा शुभदा भवति।

५.७.२ चण्डेश्वरमतम्

अत्र पीयूषधाराटीकायां आचार्यगोविन्ददैवज्ञमहोदयेन चण्डेश्वरस्य मतं प्रतिपादितं वर्तते। आचार्यचण्डेश्वरोऽपि वस्त्राणां धावनमुहूर्त्तं प्रतिपादितवानत्र। यथोक्तम् -

शनौ भूमिसुते श्राद्धे षष्ठ्यमावास्ययोस्तथा।
वस्त्रक्षालनजो दोषो दहत्यासप्तमं कुलम्॥
संक्रान्त्यां पञ्चदश्यां च द्वादश्यां च रवेर्दिने।
वस्त्रं निष्पीडयेन्नैव क्षारेणापि न योजयेत्॥

यदि शनिभौमवारयोः, श्राद्धदिने, षष्ठ्यमावास्यातिथ्योश्च वस्त्राणां धावनं कुर्वन्ति तदा वस्त्रक्षालनेनोत्पन्नः दोषः, सप्तमं कुलं पूर्वं पश्चाच्च दहति। विनाशं वा करोति। संक्रान्तिदिने, पञ्चदश्यां, द्वादश्यां रवेर्दिने च वस्त्रं नैव निष्पीडयेत्। लवणयुक्तजलेना (अथवा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साबुन इति हिन्दीभाषायां तेन) न वस्त्राणां धावनं न कर्तव्यमिति। मतमिदं वर्तते आचार्यचण्डेश्वरस्य।

बोधप्रश्नाः

१९. भूषाघटने कति नक्षत्राणि स्वीकृतानि सन्ति?

२०. भूषाघटने त्रिपुष्करयोगः स्वीकृतोऽस्ति न वा?

२१. तीक्ष्णसंज्ञकानि नक्षत्राणि कति सन्ति?

२२. 'सत्तनौ' इति पदस्यार्थः कः?

२३. उग्रसंज्ञकनक्षत्राणि कति सन्ति?

२४. वस्त्रक्षालने धनिष्ठानक्षत्रं स्वीकृतमस्ति न वा?

२५. पितृदिनं किम् वर्तते?

५.८ सारांशः

पाठेऽस्मिन् सर्वप्रथमं क्रयविक्रयस्य परिचयं दत्तवान्। क्रयो नाम मूल्यं दत्वा वस्तुग्रहणमिति। यदा क्रयिणा क्रयमुहूर्त्तः प्राप्यते तदा विक्रेत्रे मूल्यं द्रव्यं वा दत्वा पृथक्कृतं विक्रीतं वस्तु गृह्यते तत्कर्म क्रयशब्दकथितमिति। विक्रयो नाम मूल्यं गृहीत्वा यत् वस्तुदानं दीयते स एव विक्रयो भवति। विक्रेता यदा विक्रयार्थं मुहूर्त्तो गृह्यते तदा क्रयिणोऽनुज्ञां लब्ध्वा यावदिष्टं वस्तुं स्वगृहात् पृथक् क्रियते तदा तत्कर्म विक्रयशब्दमिति। क्रयविक्रयनक्षत्रेषु परस्परनिषेधं प्रतिपादितं वर्तते पाठेऽस्मिन्। यदि क्रयमुहूर्त्ते विक्रयादिकार्यं करोति तदा तस्य कार्यस्य फलं अशुभं भवति। विक्रयमुहूर्त्ते यदि क्रयादिकार्यं ये जनाः कुर्वन्ति तेषां कार्याणां फलमप्यशुभं भवति। पाठेऽस्मिन् विक्रयविपण्योर्मुहूर्त्तौ प्रतिपादितौ स्तः। विक्रयविपणिमुहूर्त्तयोः यानि नक्षत्राणि प्रतिपादितानि सन्ति तेषु नक्षत्रेषु, तिथिषु, वारेषु लग्नेषु च यदि विक्रयविपणिं करोति तदा तत्फलं शुभदायकं भवति। अत्र अश्वहस्तिक्रयविक्रयमुहूर्त्ताः निरूपिताः सन्ति। अस्मिन् मुहूर्त्ते मतान्तरवचनानि यानि सन्ति तेषां मतान्तरवचनानां पीयूषधाराटीकायां प्रतिपादनं वर्तते। भूषाघाटनादिमुहूर्त्तः प्रतिपादितो वर्तते इह पाठे। भूषादिघटनमर्थात् भूषादिनिर्माणं कदा करणीयमकरणीयं वेति प्रतिपादितम्। भूषाघटनादिमुहूर्त्ते वसिष्ठायाद्याचार्याणां मतानि प्रतिपादितानि सन्ति पाठेऽस्मिन्। मुद्रापालनवस्त्रक्षालनमुहूर्त्तोऽपि प्रतिपादितोऽस्ति। मुद्रापातनवस्त्रप्रक्षालनादिमुहूर्त्ते यानि नक्षत्राणि, तिथयः वासराश्च गृहीताः सन्ति। तेषु नक्षत्रेषु, तिथिषु शुभवारेषु च यदि मुद्रापातनवस्त्रक्षालनं भवेत् तदा शुभप्रदायकं भवति।

५.१० शब्दावली

१.	अम्बुपः	-	शतभिषक्।
२.	वातः	-	स्वाती।
३.	द्वीशः	-	विशाखा।
४.	कृशानुः	-	कृत्तिका।
५.	सत्	-	शुभम्।
६.	घटः	-	कुम्भः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

७.	आयः	–	एकादशभावः।
८.	अन्त्यम्	–	रेवती।
९.	वसुः	–	धनिष्ठा।
१०.	मरुत्	–	स्वाती।
११.	जलेशः	–	शततारकः।
१२.	आदित्यः	–	पुनर्वसुः।
१३.	भूषाघटनम्	–	भूषानिर्माणम्।
१४.	द्विदैवम्	–	विशाखा।
१५.	सत्तनौ	–	शुभलग्ने।
१६.	दहनः	–	कृत्तिका।
१७.	कुजः	–	भौमः।
१८.	पातनम्	–	निष्पादनम्।
१९.	घस्रे	–	दिने।
२०.	गुरुभृगुजास्ते	–	गुरुशुक्रास्तकाले।
२१.	ज्ञः	–	बुधः।
२२.	हयः	–	अश्विनी।

५.११ सन्दर्भग्रन्थः

१. मुहूर्तचिन्तामणिः – आचार्यरामदैवज्ञविरचितः, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

५.१२ सहायकग्रन्थः

१. मुहूर्तचिन्तामणिः – व्याख्याकारः – श्रीविन्ध्येश्वरीप्रसादद्विवेदी।

२. मुहूर्तचिन्तामणिः – व्याख्याकारः – पं. हरिशंकरपाठकः, भारतीय विद्या संस्थान, वाराणसी।

३. मुहूर्तचिन्तामणिः – श्रीकपिलेश्वरशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी।

४. मुहूर्तदीपकः - व्याख्याकारः - डॉ. श्रीकृष्णः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।

५. संस्कृत-हिन्दी-कोश, लेखकः - वामनशिवराम आप्टे, राष्ट्रिय-संस्कृत-संस्थान (मानितविश्वविद्यालय), नई दिल्ली।

५.१३ बोधप्रश्नोत्तराणि

१. मूल्यं दत्त्वा वस्तुग्रहणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२. मूल्यं गृहीत्वा वस्तुदानम्।

३. पञ्चनक्षत्राणि।

४. अशुभम्।

५. अशुभम्।

६. सप्तनक्षत्राणि।

७. चत्वारः शुभग्रहाः।

८. तर्हि।

९. त्रिषडायस्थानेषु।

१०. चतुर्थीनवमीचतुर्द्रशीतिथयः।

११. एकादशनक्षत्राणि।

१२. भवति।

१३. अश्वस्य क्रय-विक्रयणं प्रशिक्षणम् आरोहणम् इत्यादि।

१४. मृगशिरारेवतीचित्राऽनुराधानक्षत्राणि।

१५. पञ्च।

१६. गृहिणीविनाशः।

१७. धनिष्ठायाः।

१८. रिक्तातिथयः।

१९. द्वादशनक्षत्राणि।

२०. स्वीकृतोऽस्ति।

२१. मूलज्येष्ठाऽऽर्द्राश्लेषानक्षत्राणि।

२२. शुभलग्ने।

२३. पूर्वात्रयभरणीमघानक्षत्राणि।

२४. स्वीकृतम्।

२५. अमावस्या।

५.१३ अभ्यासप्रश्नाः

१. क्रयविक्रययोः परिभाषा देया।

२. क्रयविक्रयनक्षत्रेषु परस्परं निषेधः लेख्यः।

३. विपणिमुहूर्त्तः विलेखनीयः।

४. अश्वहस्तिक्रयविक्रयमुहूर्त्तः निरूपणीयः।

५. भूषाघटनमुहूर्त्तः लेखनीयः।

६. मुद्रापातनमुहूर्त्तः लेख्यः।

७. वस्त्रक्षालनमुहूर्त्तं लिखत।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षष्ठः पाठः - खड्गादिधारण-शय्योपभोग-जलाशयखननादिमुहूर्त्ताः

पाठसंरचना

६.१ प्रस्तावना
६.२ उद्देश्यम्
६.३ खड्गादिधारण-शय्याद्युपभोगानां मुहूर्त्ताः
६.३.१ खड्गकुन्तादिशस्त्रधारणस्य मुहूर्त्ताः
६.३.२ शय्यादीनाम् उपभोगस्य मुहूर्त्तः
६.४ अन्धाक्षादीनां नक्षत्राणां स्वरूपम्
६.४.१ वसिष्ठाचार्यस्य विशेषमतम्
६.४.२ अन्धाक्षादिनक्षत्राणां फलानि
६.४.३ रत्नमालाग्रन्थोक्तम् एतद्विषयकं मतम्
बोधप्रश्नाः
६.५ घनप्रयोगे निषिद्धनक्षत्राणि
६.५.१ वसिष्ठादीनां विशेषमतानि
६.६ जलाशयखननस्य नृत्यारम्भस्य च मुहूर्त्ताः
६.६.१ श्रीपत्यादीनाम् एतद्विषयक-मतानि
६.६.२ जलाशयखनने लग्नविचारः
६.६.३ मतान्तराणि
६.६.४ नृत्यारम्भमुहूर्त्तः
६.६.५ वसिष्ठादीनाम् आचार्याणां मतानि
बोधप्रश्नाः
६.७ सारांशः
६.८ शब्दावली
६.९ सन्दर्भग्रन्थः
६.१० सहायकग्रन्थाः
६.११ बोधप्रश्नोत्तराणि
६.१२ अभ्यासप्रश्नाः

६.१ प्रस्तावना

नक्षत्रप्रकरणस्य षष्ठे पाठे भवतः स्वागतं वर्तते। षष्ठमपाठात् पूर्वं भवान् क्रयविक्रयनक्षत्रेषु परस्परं निषेधं विक्रयविपण्योः मुहूर्तान् अश्वहस्तिक्रयविक्रयमुहूर्तान् भूषाघटनादिमुहूर्तान् मुद्रापातनवस्त्रक्षालनमुहूर्तान् च पठितवान्। तत्र हि जनाः यदि क्रयमुहूर्ते विक्रयादिकार्यं कुर्वन्ति तर्हि कार्यस्य फलम् अशुभं भवति। तथैव विक्रयमुहूर्ते यदि क्रयादिकार्यं कुर्वन्ति तदा तेषामपि कार्याणां फलम्, अशुभं भवति। अस्मिन्नेव पञ्चमे पाठे भवान् अश्वानां हस्तिनां च विक्रयमुहूर्तान् नक्षत्र-तिथि-वाराणां सारिणिसहितं पठितवान्। तथा च स्त्रिभिः कदा आभूषणं धरणीयम्, मुहूर्तः इति वसिष्ठादीनाम् आचार्याणां मतज्ञानपूर्वकं पठितवान्। अन्ते च राजा कदा मुद्राणां पातनं कुर्यात् कदा च जनाः वस्त्रक्षालनं कुर्युः इति सारिणिसहितं मुहूर्त्तं गणेशदैवज्ञस्य चण्डेश्वरस्य च वचनानुसारं भवान् सम्यक् अधिगतवान् एव।

सम्प्रति अस्मिन् षष्ठे पाठे भवान् खड्गादिधारणस्य शय्याद्युपभोगस्य च मुहूर्तविषये अन्धाक्षादिनक्षत्रविषये, घनप्रयोगे निषिद्धनक्षत्रविषये, जलाशयखननस्य, नृत्यारम्भस्य च मुहूर्तानां विषये विस्तृतरूपेण पठिष्यति।

प्राचीनकाले राजानः युद्धं प्रति गमनात्पूर्वमेव उत्कृष्टे मुहूर्ते शस्त्रधारणं कुर्वन्ति स्म।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

येन युद्धे साफल्यं सुनिश्चितं भवति स्म। अतः उत्तमं मुहूर्तम् अवलोक्य एव यदि खड्गादिशस्त्रधारणं कृत्वा युद्धं प्रति प्रस्थानं क्रियते तर्हि अवश्यं जयः भवति इति सर्वेषामपि अनुभवः। अतः खड्गादिधारणं उत्तमे मुहूर्ते एव करणीयम्।

अधुना समाजे स्थिताः सर्वेऽपि जनाः इच्छन्ति यत् यत्किमपि नूतनं वस्तु क्रीयते तत् चिरकालं यावत् सुरक्षितं भवेत्। तन्निमित्तम् अपि उत्तमस्य मुहूर्तस्य आवश्यकता भवति। उत्तमे मुहूर्ते प्रथमवारं यदि वस्तुनः उपयोगः क्रियते तर्हि तत् अवश्यं चिरस्थायी भवति सुरक्षितमपि तिष्ठति। अतः आसन-शय्यादीनां प्रथमप्रयोगे मुहूर्तविचारः अवश्यं कर्तव्यः।

आधुनिककाले भौतिकवादः वर्धमानः दृश्यते तत्र च सर्वविधे सौलभ्ये प्राप्ते सत्यपि दुष्टानां चौरादीनां लुण्ठकानां च प्रवृत्तिः अपि वर्धमाना अस्ति। यदि कस्यचित् जनस्य कञ्चित् वस्तु चोरेण लुण्ठितम्, अथवा अनवधानेन स्वयमेव क्वचित् तद् वस्तु स्थापितं चेत् तदन्वेषणार्थं नक्षत्रादीनां गणनया प्रयासः विधीयते ज्योतिषशास्त्रे। यः मार्गः अस्माकं पूर्वजैः महर्षिभिः महता प्रयत्नेन स्पष्टीकृतः। तन्निमित्तं अन्ध-मन्द-मध्य-सुलोचनादीनां नक्षत्राणां ज्ञानं परमावश्यकम्।

"सर्वे गुणाः काञ्चनम् आश्रयन्ति" इति काचित् प्रसिद्धा उक्तिः। अद्यत्वे प्रत्येकम् अपि जनः अधिकाधिकधनस्य प्राप्तये प्रयत्नं करोति। व्यवसायेषु च धनस्य निवेशं करोति। किन्तु कदाचित् तद्धनस्य लाभः शून्यः एव भवति अथवा तद्धनमेव नष्टं भवति कदाचित् च अन्यस्य साहाय्यं कर्तुं वयं धनं दद्मः किन्तु तस्य प्रत्यर्पणं न भवति। तादृशक्लेशानां निवारणार्थं धनदानसमये उत्तमः मुहूर्तः द्रष्टव्य एव। गृहे नवीनकूपस्य खननार्थम् अपि अवश्यं मुहूर्तविवेचनं कर्तव्यम्। नृत्यादिकलानाम् अभ्यासात् पूर्वमपि मुहूर्तम् अवलोक्य वयं दीर्घकालं यावत् सम्यक् अभ्यासं कृत्वा ताः कलाः अधिगन्तुं शक्नुमः। अस्मिन् पाठे पूर्वविवेचितविषयाणां विस्तरेण मुहूर्तकथनं विषयविवेचनं च कृतं वर्तते।

६.२ उद्देश्यम

अस्य पाठस्य अध्ययनेन भवान्-

- खड्गादिशस्त्रधारणस्य मुहूर्तानां विवेचने समर्थो भविष्यति।
- शय्या-आसनादीनाम् उपभोगस्य मुहूर्तानां प्रतिपादने निपुणो भविष्यति।
- अन्धाक्षादिनक्षत्राणाम् अभिज्ञाने प्रवीणो भविष्यति।
- अन्धाक्षादिनक्षत्राणां फलकथने समर्थो भविष्यति।
- धनप्रयोगे निषिद्धनक्षत्राणाम् अवगमने पटुः भविष्यति।
- जलाशयखननमुहूर्तानां प्रतिपादने नैपुण्यं प्राप्स्यति।
- नृत्यारम्भमुहूर्तानां निर्धारणे क्षमः भविष्यति।

६.३ खड्गादिधारण-शय्याद्युपभोगानां मुहूर्ताः

खड्गादयः शस्त्रविशेषाः, तेषु खड्गः, कुन्तः, धनुः, बाणः, छुरिका, भुशुण्डिः इत्यादयः नैके युद्धसम्बन्धिनः शस्त्रविशेषाः अन्तर्भवन्ति। एतेषां प्रयोगेण न केवलं युद्धे जयः पराजयश्च भवति अपितु साक्षात् जीवनमरणयोः अपि प्रश्नः उत्पद्यते। अत एव प्राचीनकाले यदा राजानः युद्धार्थं प्रस्थानं कुर्वन्ति स्म तदा प्रस्थानात् पूर्वं राजपुरोहितं शस्त्रधारणमुहूर्तं प्रस्थानमुहूर्तं च पृच्छन्ति स्म। उत्तमे मुहूर्ते शुभे च शकुने युद्धार्थं प्रस्थितः राजा निश्चयेन विजयी भवति स्म इति रामायण-महाभारतादिग्रन्थानाम् अवलोकनेन स्पष्टं भवति। अयं प्रयोगः आधुनिके काले अपि अवश्यं भवेत् यथा -

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विविधानां शस्त्राणां निर्माणं पूर्वपरीक्षणं च शत्रोः उपरि आक्रमणं, आक्रमणात् पूर्वम् शस्त्रधारणसमये च उत्तमः मुहूर्तः ज्ञातव्यः भवति येन युद्धे जयः अपि लभ्येत् प्राणहानिः अपि न जायेत्।

अस्मिन् विषये शास्त्रोक्ताः मुहूर्ताः ये हि आचार्यैः रामदैवज्ञैः 'मुहूर्तचिन्तामणिः' नामके ग्रन्थे प्रोक्ताः, अन्यैश्च शास्त्रकारैः अभिहिताः तेषां विस्तृतरूपेण विवेचनम् अत्र प्रस्तूयते।

६.३.१ खड्गकुन्तादिशस्त्रधारणस्य मुहूर्ताः

खड्गकुन्तादीनि सुप्रसिद्धानि शस्त्राणि विद्यन्ते। युद्धं प्रति गमनात् पूर्वं कस्मिन् समये तेषां शस्त्राणां धारणं कर्तव्यं येन जयः प्राप्येत्? कः मुहूर्तः एतेषां धारणार्थम् अत्यन्तं समीचीनः? इति जिज्ञासायाम् आचार्यः रामदैवज्ञः शस्त्रधारणमुहूर्तम् एवं प्रकारेण प्रतिपादयति।

सन्धार्याः कुन्त-वर्मेष्वसन-शर-कृपाणासिपुत्र्यो विरिक्ते
शुक्रेज्यार्केऽह्नि मैत्रध्रुव-लघुसहितादित्यशाक्रद्विदैवे।
स्युर्लग्ने हि स्थिराख्ये शशिनि च शुभदृष्टे शुभैः केन्द्रगैः स्यात्-

पदच्छेदः - सन्धार्याः। कुन्त। वर्म इष्वसन। शर। कृपाण। असिपुत्र्यः। विरिक्ते। शुक्र। इज्य। आर्के अह्नि। मैत्र। ध्रुव। लघु। सहिता। आदित्य। शाक्र। द्विदैवे। स्युः। लग्ने। हि। स्थिर। आख्ये। शशिनि। च। शुभ। दृष्टे। शुभैः। केन्द्रगैः। स्यात्।

अन्वयः - विरिक्ते शुक्रेज्यार्केऽह्नि मैत्रध्रुवलघुसहिते आदित्यशाक्रद्विदैवे, स्थिराख्ये हि लग्ने, शुभदृष्टे शशिनि, केन्द्रगैः शुभैः च कुन्त-वर्मेष्वसन-शर-कृपाणासिपुत्र्यो सन्धार्याः स्युः।

प्रतिपदार्थः - विरिक्ते = रिक्तावर्जिते (रिक्तातिथयः = ४/९/१४), शुक्रे = शुक्रग्रहे, इज्ये = बृहस्पतिग्रहे, अर्के = सूर्यग्रहे, अह्नि = वारे, मैत्रः = मित्रसंज्ञकनक्षत्राणि (मृगशिरा-रेवती-चित्रा-अनुराधाः), ध्रुवः = ध्रुवसंज्ञकनक्षत्राणि (उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिण्यः), लघु = लघुसंज्ञकनक्षत्राणि (हस्त-अश्विनी-पुष्याः), सहिते = समेते, आदित्ये = पुनर्वसुनक्षत्रे, शाक्रे = ज्येष्ठानक्षत्रे, द्विदैवे = विशाखानक्षत्रे, स्थिराख्ये = वृष-सिंह-वृश्चिक-कुम्भराशिष्वन्यतमे राशौ, गुरु-शुक्रयोरन्यतरेषु), दृष्टे = अवलोकिते, शशिनि = चन्द्रे, केन्द्रगैः = केन्द्रभावेषु (1-4-7-10) गतैः अथवा स्थितैः, शुभैः = शुभग्रहैः च, कुन्तः = प्रासः (हिन्दीभाषायां = भाला), वर्म = कवचम्, इष्वसनम् = धनुः, शरः = बाणः, कृपाणः = खड्गः, असिपुत्री = छुरिका, सन्धार्याः = सम्यक् धार्याः अर्थात् धारणीयाः, स्युः = भवेयुः।

भावार्थः - अस्मिन् श्लोके प्रथमतः स्पष्टतया खड्गादिशस्त्राणां धारणस्य मुहूर्तप्रसङ्गे खड्गादिधारणोपयुक्ताः रिक्तातिथिवर्जिताः वासराः उक्ताः, तदनन्तरं नक्षत्राणि ततश्च उपयुक्तं लग्नम् अपि वर्णितम्। यस्य विस्तारतः वर्णनम् अत्र प्रस्तूयते -

१. खड्गादिधारणोपयुक्ततिथयः वासराश्च -

श्लोके स्पष्टतया "विरिक्ते शुक्रेज्यार्केऽति" इति कथितम्। अत्र विगता रिक्ता यस्मात् सः विरिक्तः इत्यर्थः, रिक्ताशब्दात् रिक्तातिथीनां ग्रहणम्। ताश्च चतुर्थी-नवमी-चतुर्दशीरूपेण प्रसिद्धाः। एवं प्रकारेण रिक्तासंज्ञक-तिथीन् विहाय अन्यतिथिषु, शुक्र-गुरु-रविवासरेषु च खड्गादिशस्त्रधारणम् अत्यन्तं प्रशस्तं भवति। अत्र इज्यशब्दः गुरोः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्कश्च रवेः पर्यायपदं भवति।

२. खड्गादिधारणोपयुक्तानि नक्षत्राणि -

शस्त्रधारणस्य मुहूर्तः यदि अवलोकनीयः चेत् नक्षत्रावलोकनमपि करणीयमेव। तन्निमितम् उपयुक्तानि नक्षत्राणि आचार्यैः क्रमशः मैत्र-ध्रुव-लघु-आदित्य-शाक्र-द्विदैवादीनि उक्तानि।

मैत्रसंज्ञकनक्षत्राणि यथा - ''मृगान्त्यचित्रामित्रर्क्षं मृदु मैत्रं भृगुस्तथा'' अतः मृशशिरा-रेवती-चित्रा-अनुराधाश्च मैत्रसंज्ञकनक्षत्राणि।

ध्रुवसंज्ञकनक्षत्राणि अस्माभिः पूर्वमपि ज्ञातानि एव यथा - ''उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम्''। इत्यादीनि।

लघुनक्षत्राणां विषये अपि पूर्वमेव अस्माभिः पठितम्। यथा -

''हस्ताश्विपुष्याभिजितः क्षिप्रं लघु गुरुस्तथा''।

अर्थात् हस्त-अश्विनी-पुष्य-अभिजितः लघुसंज्ञकनक्षत्राणि। आदित्यशब्दात् पुनर्वसुनक्षत्रं ज्ञातव्यम्। यतो हि पुनर्वसोः स्वामी आदित्यः, अतः एतस्य नक्षत्रस्य आदित्यः इत्यपि अपरं नाम, तथैव शक्रः स्वामी यस्य सः शाक्रः इति व्युत्पत्तिवशात् ज्येष्ठा नक्षत्रस्य स्वामी शक्रः अतः ज्येष्ठायाः अपरं नाम शाक्रः इत्यपि प्रसिद्धम्। द्विदैवः इत्यत्र द्वौ देवौ यस्य सः (देवः = स्वामी) इति व्युत्पत्त्या शक्रः अग्निश्च द्वौ अपि देवौ विशाखानक्षत्रस्य प्रसिद्धौ, अतः अस्य नक्षत्रस्य अन्यत् नाम द्विदैवः इत्युच्यते।

एवं प्रकारेण क्रमशः मैत्र-ध्रुव-लघु-आदित्य-शाक्र-द्विदैवनक्षत्राणि खड्गादिधारणार्थम् अत्यन्तम् उपयुक्तानि भवन्ति।

3. खड्गादिधारणोपयुक्तं लग्नम् -

''लग्ने हि स्थिराख्ये शशिनि च शुभदृष्टे'' इति कथनात् एतद् अवगन्तव्यम् यत् लग्ने कश्चन स्थिरराशिः स्यात्, स्थिरराशयः तु वृष-सिंह-वृश्चिक-कुम्भाः कथिताः सन्ति। तेषु च शुभग्रहाणां दृष्टियुक्तः चन्द्रः भवेत्। एवं प्रकारेण स्थिरराशियुक्ते लग्ने शुभग्रहैः दृष्टः चन्द्रः भवेत् केन्द्रस्थानेषु च शुभग्रहाः भवन्ति चेत् अयं योगः मुहूर्तः वा खड्गादिधारणार्थम् अत्यन्तम् उत्कृष्टः भवति। एवं प्रकारेण खड्गादिशस्त्रधारणमुहूर्तानां स्पष्टतया अवगमार्थं सारिणी अत्र प्रस्तूयते।

(खड्गादिधारणमुहूर्तानां सारिणी)

तिथयः	1, 2, 3, 5, 6, 7, 8, 10, 11, 12, 13, 15
वासराः	शुक्रवासरः, गुरुवासरः, रविवासरः
नक्षत्राणि	मृगशिरा-रेवती-चित्रा-अनुराधा-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणी-हस्त-अश्विनी-पुष्य-पुनर्वसु-ज्येष्ठा-विशाखाः।
लग्नम्	वृष-सिंह-वृश्चिक-धनुराशिषु चन्द्रस्थितिः। 1-4-7-10 स्थानेषु शुभग्रहाणां स्थितिः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६.३.२ शय्यादीनाम् उपभोगस्य मुहूर्तः

जीवने सर्वविधसुखानां प्राप्तिनिमित्तम् एव प्रत्येकम् अपि जनः अहर्निशं श्रमं करोति। आदिनं कृतेन श्रमेण प्राप्तायाः श्रान्तेः दूरीकरणार्थं शय्या एव सर्वोत्तम साधनं मन्यते। यत्र सुखेन निद्रां कृत्वा नूतनाम् ऊर्जां सम्प्राप्य पुनः परिश्रमार्थं सिद्धः भवति। अतः सुखप्राप्तेः उत्तमसाधनानां शय्या-आसनादीनां प्रथमतः उपभोगात् अथवा उपयोगात् पूर्वं मुहूर्तः अवश्यम् अवलोकनीयः। येन चिरकालं यावत् शय्यादीनां सुखं लभ्येत्। शय्यादीनां प्रथमोपयोगविषये आचार्यः रामदैवज्ञः प्रतिपादयति यत्-

"स्याद्भोगः शय्यासनादेर्ध्रुव-मृदु-लघु-हर्यन्तकादित्य इष्टः"।

अन्वयः - ध्रुव-मृदु-लघु-हर्यन्तकादित्ये शय्यासनादेः भोगः इष्टः स्याद्।

प्रतिपदार्थः- ध्रुवः = ध्रुवसंज्ञकनक्षत्राणि (उत्तरात्रयं रोहिणी च), मृदु = मृदुनक्षत्राणि (मृगशिरा-रेवती-चित्रा-अनुराधाः), लघु = लघुसंज्ञकनक्षत्राणि (हस्त-अश्विनी-पुष्यः), हरिः = श्रवणनक्षत्रम्, अन्तकम् = भरणीनक्षत्रम्, आदित्यः = पुनर्वसुनक्षत्रम्, (एतेषु नक्षत्रेषु) शय्या = खट्वादिरूपः पर्यंकः वा, आसनादेः = उपवेषणस्य पीठादिकस्य, भोगः = उपभोगः, इष्टः = हितकरः, स्यात् = भवेत्।

भावार्थः - शय्यासनादीनां प्रथमोपयोगविषये शुभनक्षत्राणि प्रतिपादितानि सन्ति। तेषु मृदुसंज्ञकानि मृगशिरा-रेवती-चित्रा-अनुराधानक्षत्राणि, लघुसंज्ञकानि हस्त-अश्विनी-पुष्य-अभिजित्नक्षत्राणि, हरिः श्रवणनक्षत्रस्य स्वामी, अतः श्रवणनक्षत्रस्य अपरं नाम हरिः अपि। अन्तकः = यमः, भरणीनक्षत्रस्य स्वामी अयम् अतः भरणीनक्षत्रं अन्तकनाम्नाऽपि प्रसिद्धम्, आदित्यशब्दात् च पुनर्वसुनक्षत्रं ज्ञेयम्। एवं प्रकारेण ध्रुव-मृदु-लघु-श्रवण-भरणी-पुनर्वसु-नक्षत्राणि शय्यादीनाम् उपभोगार्थं प्रशस्तानि भवन्ति। 'शय्यासनादि' इत्यत्र आदिपदेन पर्यङ्कः खट्वा, चतुःशायिका, तल्पः, तूलिका, आसन्दः, पीठं, मृगासनम्, कुशासनम्, कम्बलासनम्, कटः इत्यादयश्च सर्वे पर्यायाः अवगन्तव्याः। उपभोगपदेन च प्रथमः उपयोगः अत्र ग्राह्यः। स्पष्टतया अवगमनार्थं शय्यासनादीनाम् उपभोगस्य मुहूर्तप्रकाशिका सारिणी अत्र प्रस्तूयते।

"शय्याद्युपभोगमुहूर्तसारिणी"

शुभनक्षत्राणि	उत्तरफल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा, रोहिणी, मृगशिरा, रेवती, चित्रा, अनुराधा, हस्त, अश्विनी, पुष्यः, श्रावणं, भरणी, पुनर्वसुः।

६.४ अन्धाक्षादीनां नक्षत्राणां स्वरूपम्

आचार्यः रामदैवज्ञः नक्षत्रप्रकरणस्य आरम्भे एव नक्षत्राणां मृदु-मैत्र-ध्रुवादिविभागान् कृत्वा ततश्च सरलरूपेण मुहूर्तचिन्तनं करोति। तत्र हि खड्गादिधारणस्य शय्याद्युपभोगस्य च मुहूर्तान् उक्त्वा ततः मानवजीवनस्य प्रमुखसमस्याम् आधारीकृत्य स्पष्टतार्थं संक्षेपार्थंच अन्धाक्षादिरूपेण नक्षत्राणां विभागं करोति। ततः परं 'विनष्टार्थस्य' इत्यादिश्लोकेन नष्टधनस्य अभिज्ञानार्थम् अन्धाक्षादिनक्षत्राणां वर्णनं करोति। नष्टं धनं वस्तुतः बहुप्रकारकं भवति। विशेषतः १. विस्मृतं २. लुप्तम् ३. अपहृतञ्च।

१. विस्मृतम् - बहुभिः क्लेशैः आवृतः मानवः सर्वदा चिन्ताग्रस्तः दृश्यते। क्लेशकारणात् मनसः आघातं च बहुधा प्राप्नोति येन स्मरणशक्तिः क्षीणा भवति। अतः स्वयमेव क्वचित् स्थापितं धनं कालान्तरे न स्मर्यते। तदेव स्वयं क्वचित् स्थापितं विस्मरणवशात् च लुप्तं धनं विस्मृतधनम् उच्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२. लुप्तम् – क्वचित् सम्मद्रयुक्ते स्थाने अनवधानवशात् जनानां धनं स्वतः पतति लुप्तं च भवति अथवा समारोहेषु, उत्सवेषु अथवा मेलापकादिषु दौर्भाग्यात् पितृणां सम्बन्धिनां वा हस्तात् बालाः स्त्रियः वृद्धाः वा पृथक्भूत्वा लुप्ताः भवन्ति, तेषाम् अन्वेषणार्थं महान् प्रयासः कर्तव्यः भवति।

३. अपहृतम् – चौरैः लुण्ठकैश्च बलात् स्वीकृतं धनमेव अपहृतं धनं भवति। एवं प्रकारेण विविधप्रकारैः धनस्य स्वप्रियस्य च वियोगः अवलोक्यते। इदं विनष्टं लुप्तं च धनं पुनः प्राप्यते न वा? इत्यादिप्रश्नस्य उत्तरं प्रदातुम् आदौ अन्धाक्षादिनक्षत्राणां स्वरूपं प्रतिपादितम् आचार्यैः।

मूलपाठः –

अन्धाक्षं वसुपुष्यधातृजलभद्वीशार्यमान्त्याभिधं
मन्दाक्षं रविविश्वमैत्रजलपाश्लेषाश्विचान्द्रं भवेत्।
मध्याक्षं शिवपित्रजैकचरणत्वाष्ट्रैन्द्रविध्यन्तकं
स्वक्षं स्वात्यदितिश्रवोदहनभाहिर्बुध्न्यरक्षो भगम्॥

पदच्छेदः – अन्धम्। अक्षम्। वसु। पुष्य। धातृ। जलभ। द्वीशक्। अर्यमा। अन्त्य। अभिधम्। मन्दं अक्षम्। रवि। विश्व। मैत्र। जलप। आश्लेषा। अश्विनी। चान्द्रं। भवेत्। मध्यं। अक्षम्। शिव। पित्र। अजं। एकचरण। त्वाष्ट्र। इन्द्र। विधि। अन्तक। स्वक्षं। स्वाति। अदिति। क्षवः। दहन। भं। कृत्तिका। अहिर्बुधन्यं। रक्षः। भगम्।

अन्वयः – वसुपुष्यधातृजलभद्वीशार्यमान्त्याभिधं (नक्षत्रम्) अन्धाक्षं (भवेत्)। रविविश्वमैत्रजलपाश्लेषाश्विचान्द्रं मन्दाक्षं भवेत्। शिवपित्रजैकचरणत्वाष्ट्रैन्द्रविध्यन्तकं मध्याक्षं (भवेत्)। स्वात्यादितिश्रवोदहनभाहिर्बुध्न्यरक्षो भगं स्वक्षं (भवेत्)।

प्रतिपदार्थः – वसुः = धनिष्ठानक्षत्रम्, पुष्यः = पुष्यनक्षत्रम्, धातृ = रोहिणीनक्षत्रम्, जलभम् = पूर्वाषाढानक्षत्रम्, द्वीशं = विशाखानक्षत्रम्, अर्यमा = उत्तराफाल्गुनी, अन्त्यं = रेवतीनक्षत्रम्, अभिधं = नामकं, अन्धाक्षं = अन्धलोचनसंज्ञं भवेत्। रविः = हस्तनक्षत्रम्, विश्वे = उत्तराषाढानक्षत्रम्, मैत्रम् = अनुराधा, जलपं = शतभिषक्नक्षत्रम्, आश्लेषा = प्रसिद्धमेव आश्लेषानामकं नक्षत्रम्, अश्वि = अश्विनीनक्षत्रम्, चान्द्रम् = मृगशिरानक्षत्रम्, मन्दाक्षं = मन्दलोचनसंज्ञं भवेत्। शिवः = आर्द्रानक्षत्रम्, पित्रम् = मघानक्षत्रम्, अजैकचरणः = पूर्वाभाद्रपदानक्षत्रम्, त्वाष्ट्रं = चित्रानक्षत्रम्, ऐन्द्रं = ज्येष्ठानक्षत्रम्, विधिः = अभिजित् नक्षत्रम्, अन्तकं = भरणीनक्षत्रम्, मध्याक्षं = मध्यलोचनसंज्ञकं भवेत्। स्वाती = स्वातीनामकं नक्षत्रम्, अदितिः = पुनर्वसुनक्षत्रम्, श्रवः = श्रवणनक्षत्रम्, दहनभं = कृत्तिकानक्षत्रम्, अहिर्बुध्न्यं = उत्तराभाद्रपदानक्षत्रम्, रक्षः = मूलनक्षत्रम्, भगं = पूर्वाफाल्गुनीनक्षत्रम्, स्वक्षं = सुलोचनसंज्ञकं भवति।

भावार्थः – अस्मिन् श्लोके मुहूर्तादिविषये न किमपि प्रतिपादयति आचार्यः। अपि तु नक्षत्राणां अन्धाक्षादिरूपेण विभागं कृत्वा नक्षत्राणां गणशः विभागः कृतः। यद्यपि नक्षप्रकरणस्य आरम्भे एव नक्षत्रस्वामिनां नामानि उक्त्वा पुनः नक्षत्राणां स्वरूपादिभेदेन संक्षेपार्थं ध्रुव-चर-लघु-मृदु-इत्यादिप्रकारेण विभागः कृतः। परन्तु अन्धाक्षादिरूपेण विभागं तत्र अकृत्वा प्रसङ्गानुगुणं सम्प्रति विनष्टस्य धनस्य पुनः प्राप्त्यर्थम् उपयोगिनां नक्षत्राणां गणशः विभागं कृत्वा अन्धाक्षादयः संज्ञाः उच्यन्ते। विविधानां नक्षत्राणां पर्यायपदानि यदि जायन्ते तर्हि सरलतया नक्षत्राणाम् अन्धाक्षादयः विभागाः अपि स्फुटतया अवगम्यन्ते। अयं च विभागः चतुर्धा कृतः –

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१. अन्धाक्षम् २. मन्दाक्षम्

३. मध्याक्षम् ४. सुलोचनम् इति।

१. धनिष्ठा-पुष्य-रोहिणी-पूर्वाषाढा-विशाखा-उत्तराफाल्गुनी-रेवती-नक्षत्राणां अन्धाक्षम् अर्थात् अन्धलोचनम् इति संज्ञा वर्तते।

२. हस्त-उत्तराषाढा-अनुराधा-शतभिषक्-आश्लेषा-अश्विनी-मृगशिरा-नक्षत्राणां मन्दाक्षम् अर्थात् मन्दलोचनम् इति संज्ञा वर्तते।

३. आर्द्रा-मघा-पूर्वाभाद्रपदा-चित्रा-ज्येष्ठा-अभिजित्-भरणीनक्षत्राणां मध्याक्षम् अर्थात् मध्यलोचनम् इति संज्ञा वर्तते।

४. स्वाती-पुनर्वसु-श्रवण-कृत्तिका-उत्तराभाद्रपदा-मूल-पूर्वाफाल्गुनीनक्षत्राणां स्वक्षम् अर्थात् सुलोचनम् इति संज्ञा वर्तते।

६.४.१ वसिष्ठाचार्यस्य विशेषमतम्

अन्धाक्षादिसंज्ञकानां नक्षत्राणां सरलतया अवबोधार्थं सुकरः मार्गः उक्तः वर्तते वसिष्ठमहर्षिभिः, यथा -

''अन्धकमथ मन्दाक्षं मध्यसंज्ञं सुलोचनं पश्चात्।
पर्यायेण च गणयेच्चतुर्विधं ब्रह्मधिष्ण्यातः॥'' इति।

अत्र ब्रह्मधिष्ण्यम् इति शब्देन रोहिणीनक्षत्रं ज्ञातव्यम्। रोहिणीनक्षत्रात् आरभ्य चतुर्विधपर्यायेण अभिजित्सहितानि नक्षत्राणि गणनीयानि। तस्मात् सप्त-सप्तनक्षत्राणां चत्वारः गणाः जायन्ते। ते गणाः एव अन्धाक्षमन्दाक्षादिरूपेण भवन्ति।

स्पष्टतया अभिज्ञानार्थम् एका सारिणी अत्र प्रस्तूयते।

अन्धाक्षादिनक्षत्रसारिणी

संज्ञा	नक्षत्राणि						
अन्धाक्षम्	रोहिणी	पुष्य	उ. फल्गुनी	विशाखा	पूर्वाषाढा	धनिष्ठा	रेवती
मन्दाक्षम्	मृगशिरा	आश्लेषा	हस्त	अनुराधा	उत्तराषाढा	शतभिषक्	अश्विनी
मध्याक्षम्	आर्द्रा	मघा	चित्रा	ज्येष्ठा	अभिजित्	पूर्वाभाद्रा	भरणी
स्वक्षम्	पुनर्वसु	पूर्वाफल्गुनी	स्वाती	मूला	श्रवण	उ.भाद्रपदा	कृत्तिका

६.४.२ अन्धाक्षादिनक्षत्राणां फलानि

आचार्यः रामदैवज्ञः नक्षत्राणाम् अन्धाक्षादिरूपेण विभागं कृत्वा तत्प्रयोजनं विशेषतः प्रतिपादयति यत् विनष्टस्य धनस्य पुनः प्राप्त्यर्थम् इमानि अन्धाक्षादीनि नक्षत्राणि अत्यन्तम् उपयुक्तानि। सामान्यतः अद्यत्वे लोके इयम् अवधारणा अस्ति यत् एकवारं लुप्तं हृतम् अथवा नष्टं धनं न पुनः प्राप्यते। किन्तु मुहूर्तशास्त्रे त्रिकालदर्शिभिः आचार्यैः नक्षत्रगणनया नष्टधनस्य स्थितेः प्राप्तेश्च विमर्शः कृतः वर्तते अर्थात् नष्टं धनं पूर्णतया नष्टमेव अथवा सम्प्रति क्वचित् प्राप्तुं शक्यते, प्राप्तेश्च संभावना कियती इत्यादिकं विवेचनम् अस्मिन् श्लोके स्पष्टतः प्रस्तुतमस्ति। यथा -

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"विनष्टार्थस्य लाभोऽन्धे शीर्घं मन्दे प्रयत्नतः।
स्याद् दूरे श्रवणं मध्ये श्रुत्याप्ती न सुलोचने॥"

पदविभागः - विनष्ट। अर्थस्य। लाभः। अन्धे। शीघ्रम्। मन्दे। प्रयत्नतः। स्याद्। दूरे। श्रवणम्। मध्ये। श्रुति। आप्ती। न सुलोचने।

अन्वयः - अन्धे विनष्टार्थस्य शीर्घं लाभः स्यात्, मन्दे (विनष्टार्थस्य) प्रयत्नतः (लाभः स्यात्), मध्ये (विनष्टार्थस्य) दूरे श्रवणं (स्यात्), सुलोचने (विनष्टार्थस्य) श्रुत्याप्ती न (स्यात्)।

प्रतिपदार्थः - अन्धे = अन्धसंज्ञकेषु धनिष्ठा-पुष्य-रोहिणी-पूर्वाषाढा-विशाखा-उत्तराफाल्गुनी-रेवती- नक्षत्रेषु, विनष्टार्थस्य-विनष्टस्य अर्थात् अपहृतस्य लुप्तस्य वा अर्थस्य = धनस्य, शीर्घं = झटिति (अल्पे काले), लाभः = प्राप्तिः, स्यात् = भवेत्। मन्दे = मन्दसंज्ञकेषु हस्त-उत्तराषाढा- अनुराधा-शतभिषक्-आश्लेषा-अश्विनी-मृगशिरानक्षत्रेषु, प्रयत्नतः = परिश्रमपूर्वकं अन्वेषणेन लाभः भवेत्। मध्ये = मध्यसंज्ञकेषु आर्द्रा-मघा-पूर्वाभाद्रपदा-चित्रा-ज्येष्ठा-अभिजित्-भरणीनक्षत्रेषु, दूरे = स्वस्थानात् दूरे स्थाने क्षेत्रे वा, श्रवणम् = लोकश्रुतिः अर्थात् नष्टम् अपहृतं वा वस्तु अमुकस्थाने अस्ति इति जनानां मुखात् श्रूयते। सुलोचने = सुलोचनसंज्ञकेषु स्वाती-पुनर्वसु-श्रवण- कृत्तिका-उत्तराभाद्रपदा- मूल-पूर्वाफाल्गुनीनक्षत्रेषु, श्रुत्याप्ती = न श्रवणं न च लब्धिः स्यात्।

भावार्थः - पूर्वस्मिन् श्लोके आचार्यैः रामदैवज्ञैः अन्ध-मन्द-मध्य-सुलोचनाक्षादयः नक्षत्रविभागाः कृताः। तेषां विभागस्य प्रयोजनं सम्प्रति अस्मिन् प्रकरणे महत् विद्यते। अत्र हि नष्टद्रव्यस्य पुनः प्राप्तेः सम्भावना अस्ति न वा इति निर्णयः एतेषां अन्धाक्षादिसंज्ञकनक्षत्राणाम् आधारेण भवति। यथा -

१. अन्धघाक्षसंज्ञकनक्षत्रेषु नष्टस्य वस्तुनः अतिशीघ्रमेव पुनः प्राप्तिः भवति। अत्र नष्टवस्तुपदेन लुप्तस्य वस्तुनः, हृतस्य द्रव्यस्य, पित्र्यादिसङ्गात् विरक्तस्य लुप्तस्य बालकस्य अन्यसम्बन्धिनां वा, रुष्टो भूत्वा अन्यत्र गतस्य च आत्मीयस्य अपि स्वीकरणं क्रियते।

२. मन्दाक्षसंज्ञकनक्षत्रेषु नष्टस्य लुप्तस्य अपहृतस्य वा वस्तुनः प्रतिप्राप्तिः अत्यन्तं परिश्रमेण भवति। अर्थात् बहुशः अन्वेषणेन उपायादिभिश्च विनष्टद्रव्यस्य प्राप्तिः भवति।

३. मध्याक्षनक्षत्रेषु यदि कञ्चित् वस्तु विनश्यते तर्हि नष्टवस्तुनः प्राप्तेः सम्भावना तु भवति, किन्तु तद् वस्तु दूरस्थे भूभागे क्वचिद् अस्ति इति श्रवणं भवति। अर्थात् तद् वस्तु धनादिकं वा दूरे क्वचिद् अस्ति किन्तु तस्य पुनः प्राप्तेः तु केवलं सम्भावना एव भवति न तु सुनिश्चयः।

४. सुलोचनसंज्ञकनक्षत्रेषु लुप्तस्य हृतस्य वा वस्तुनः न कुत्रापि श्रवणं भवति न च तस्य प्राप्तिः भवति। अर्थात् सुलोचननक्षत्रेषु विनष्टद्रव्यं पूर्णतया नष्टमेव भवति।

पूर्वोक्तविवरणस्य स्पष्टतया अवगमार्थं काचित् सारिणी अत्र प्रस्तूयते -

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संज्ञा	नक्षत्राणि						परिणामः
अन्धाक्षः	रोहिणी	पुष्य	उपलुनी	विशाखा	पूषाढ	धनिष्ठ	रेवती	शीघ्रलाभः
मन्दाक्षः	मृगशिरा	आश्लेषा	हस्त	अनुराधा	उत्तराषाढ	शतभिषक्	अश्विनी	प्रयत्नेन लाभः
मध्याक्षः	आर्द्रा	मघा	चित्रा	ज्येष्ठा	अभिजित्	पूर्वभाद्र	भरणी	दूरे श्रवणम्
सुलोचनः	पुनर्वसुः	पू फल्गुनी	स्वाती	मूल	श्रवण	उत्तराभाद्रा	कृत्तिका	न श्रवणम् न प्राप्तिः

६.४.३ रत्नमालाग्रन्थोक्तम् एतद्विषयकं मतम्

यद्यपि रत्नमालाग्रन्थे प्रतिपादितम् अन्धाक्षादीनां नक्षत्राणां फलं नाधिकं भिन्नं भवति तथापि तत्र उक्तानि कानिचन पदानि अवश्यम् अवलोकनीयानि एव। तत्र उक्तम्-

"लाभोऽन्धके निकट एव हृतस्य चौरै-
र्द्रव्यस्य लब्धिरिह केकरभे प्रयत्नात्।
दूरश्रुतिश्चिपिटभेषु कथञ्चिदेव
न प्राप्तिरुत्तमविलोचनभे कदाचित्॥"

अस्य अर्थः अयमस्ति यत् अन्धाक्षसंज्ञकनक्षत्रेषु हृतस्य विनष्टस्य च धनस्य वस्तुनः वा लाभः निकटे भवति शीघ्रं च भवति। केकरभे इति पदस्य अर्थः भवति मन्दाक्षे, एवं प्रकारेण केकरभे अर्थात् मन्दाक्षसंज्ञकनक्षत्रेषु विनष्टवस्तुनः पुनः प्राप्तिः प्रयत्नात् भवति, परिश्रमेण अन्वेषणात् च भवति। 'चिपिटभेषु' इति पदस्य अर्थः वर्तते मध्याक्षसंज्ञकेषु नक्षत्रेषु। एतेषु मध्याक्षसंज्ञकनक्षत्रेषु विनष्टधनस्य प्राप्तिः येन-केन प्रकारेण भवति। किन्तु विलोचनसंज्ञकनक्षत्रेषु तु विनष्टवस्तुनः प्राप्तिः न कदाचिदपि भवति इति।

बोधप्रश्नाः

१. चतुर्थी-नवमी-चतुर्दशीतिथीनां विशिष्टा संज्ञा का?

२. 'इज्यः' शब्दस्य कोऽर्थः?

३. स्थिरलग्ने चन्द्रस्य स्थितिवशात् केषां धारणं प्रशस्तम्?

४. मृदुसंज्ञकनक्षत्राणि कानि?

५. धनिष्ठा-पुष्य-रोहिणी-पूर्णाषाढा-विशाखादिसप्तनक्षत्राणां विशेष संज्ञा का?

६. 'रवि' शब्देन कस्य नक्षत्रस्य ग्रहणं भवति?

७. सुलोचनसंज्ञकनक्षत्राणि कति सन्ति?

८. विनष्टार्थस्य दूरे श्रवणं केषु नक्षत्रेषु सम्भवति?

९. मध्यसंज्ञकनक्षत्रेषु विनष्टार्थस्य स्थितिः का भवति?

१०. विनष्टार्थस्य न श्रवणं न लाभः केषु नक्षत्रेषु सम्भवति?

६.५ धनप्रयोगे निषिद्धनक्षत्राणि

अस्मिन् संसारे मानवः सुखप्राप्तेः साधनानि सर्वाणि अपि आत्मसात् कर्तुम् इच्छति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तन्निमितं विशेषतः धनस्य आवश्यकता सर्वोपरि भवति। अत एव प्रायः उच्यते अपि ''अर्थस्य पुरुषो दासः'' इति। धनम् अर्जयन् मानवः कदाचित् अधिकधनप्राप्तये स्ववित्तं वाणिज्यादिषु निवेशयति, कदाचित् न्यासरूपेण अन्यस्य समीपे स्थापयति, बहुधा ऋणरूपेण अन्येभ्यः च यच्छति। बहुविधप्रकारैः निवेशितं प्रदत्तं च धनं बहुधा नष्टमपि भवति प्रतिप्राप्तिः अपि न सम्भवति।

नष्टधनस्य पुनप्राप्तिः सम्भवति न वा इत्यादिकं तु वयं पूर्वस्मिन् प्रकरणे पठितवन्तः एव। सम्प्रति कस्मिन् समये अथवा केषु नक्षत्रेषु निवेशितं धनं न पुनः प्राप्यते? इदमेव विवेचनं अत्र क्रियते। तन्निमित्तं धनप्रयोगे निषिद्धनक्षत्राणि प्रतिपादयति आचार्यः रामदैवज्ञः। यथा-

''तीक्ष्णमिश्रध्रुवोग्रैर्यद् द्रव्यं दत्तं निवेशितम्।
प्रयुक्तं च विनष्टं च विष्ट्यां पाते न चाप्यते॥'' इति।

पदच्छेदः - तीक्ष्णम्। मिश्रम्। ध्रुवम्। उग्रैः। यद्। द्रव्यम्। दत्तम्। निवेशितम्। प्रयुक्तं। च। विनष्टं। च। विष्ट्यां। पाते। न। च। आप्यते।

अन्वयः - तीक्ष्ण-मिश्र-ध्रुव-उग्रैः यद् द्रव्यं दत्तं निवेशितम्, प्रयुक्तं विनष्टं च (भवति) (तद्) न चाप्यते, विष्टयां पाते च (न आप्यते)।

प्रतिपदार्थः - तीक्ष्णैः = तीक्ष्णसंज्ञकैः मूल-ज्येष्ठा-आर्द्रा-आश्लेषा-नक्षत्रैः, मिश्रैः = मिश्रसंज्ञकैः विशाखा-कृत्तिकानक्षत्रैः, उग्रैः = उग्रसंज्ञकैः, पूर्वाफल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपद्-भरणी-मघानक्षत्रैः, यद् = यत् प्रकारकं यादृशं वा, द्रव्यम् = सुवर्णादिकं धातुद्रव्यं धनं वा, दत्तम् = दानरूपेण अन्यस्मै प्रदत्तम्, निवेशितम् = स्वसम्बन्धिनः प्रियस्य वा समीपे प्रत्ययार्थं स्थापितं, प्रयुक्तं = उत्तमेषु धर्मादिकार्येषु व्ययितम्, विनष्टं = चौरादिना हृतम्, स्वयं क्वचित् लोपितं त्यक्तं वा न च आप्यते = न पुनः प्राप्यते। विष्ट्यां = भद्रासंज्ञककरणे, पाते = व्यतीपातसंज्ञके महापातनामके योगे च दत्तं निवेशितं प्रयुक्तं विनष्टं वा धनं न पुनः प्राप्यते।

भावार्थः - अस्मिन् प्रकरणे स्पष्टतया इदं बोधितम् अस्ति यत् कदा धनप्रयोगः कर्त्तव्यः कदा न। यदि कश्चन जनः उत्तमे नक्षत्रे काले च धनस्य निवेशं दानं वा करोति तर्हि तस्य धननाशस्य न कापि सम्भावना भवति। तद्विपरीतं तीक्ष्णादिनिषिद्धनक्षत्रेषु कृतः धननिवेशः हानिमेव जनयेत्। अत आचार्यः रामदैवज्ञः धनस्य प्रयोगार्थं निषिद्धनक्षत्राणां करणानां योगानां च प्रतिपादनम् अस्मिन् श्लोके स्पष्टतया करोति।

(अ) नक्षत्राणि - आचार्येण आहत्य पञ्चदशनिषिद्धनक्षत्राणि उक्तानि। तत्र चत्वारि तीक्ष्णसंज्ञकनक्षत्राणि, द्वे मिश्रसंज्ञकनक्षत्रे, चत्वारि ध्रुवसंज्ञकनक्षत्राणि, पञ्च उग्रसंज्ञकनक्षत्राणि च। एवम् आहत्य ८ + २ + ४ + ५ = १५ नक्षत्राणि भवन्ति। अत्र तीक्ष्णसंज्ञकनक्षत्राणि कानि इति सन्देहः उत्पद्येत्। तदर्थं पूर्वमेव अस्माभिः पठितं यत्।

''मूलेन्द्रार्द्राहिभं सौरिस्तीक्ष्णं दारुणसंज्ञकम्'' इति।

- मिश्रसंज्ञकनक्षत्राणि - ''विशाखा कृतिका च।

- ध्रुवसंज्ञकनक्षत्राणि - उत्तरात्रयं रोहिणी च।

- उग्रसंज्ञकनक्षत्राणि - पूर्वात्रय याम्यमेघ

एवं प्रकारेण आहत्य पञ्चदशनक्षत्राणि धनस्य सर्वविश्वप्रयोगार्थं निषिद्धानि एव।

(आ) करणम् - ज्योतिश्शास्त्रे मुहूर्तावलोकने प्रसिद्धपञ्चाङ्गस्य अङ्गभूतेषु करणेषु

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विष्टिनामकं करणं लोके यत् भद्रा नाम्ना प्रसिद्धम् अस्ति। इदमपि धनप्रयोगे सर्वथा निषिद्धमेव। भद्रा हि प्रतिपक्षे मासे च नियतरूपेण भवति। यथा –

"शुक्ले पूर्वार्द्धेऽष्टमी पञ्चदश्योर्भद्रैकादश्यां चतुर्थ्यां परार्धे
कृष्णेऽन्त्यार्धे स्यात्तृतीयादशम्योः पूर्वे भागे सप्तमी शम्भुतिथ्योः॥ (मु.चि.१/४३)

(इ) योगः – पञ्चाङ्गस्थेषु योगेषु व्यतीपातनामकः योगः अपि आचार्यैः धनप्रयोगे निषिद्धः प्रोक्तः। अथ व्यतीपात एव पातः महापातश्च इति नाम्ना प्रसिद्धः। अस्मिन् योगे कृतः धनप्रयोगः अपि हानये एव भवति।

धनप्रयोगे निषिद्धकालः सारिणीमाध्यमेन अत्र प्रस्तूयते –

नक्षत्राणि	1. तीक्ष्णनक्षत्राणि – मूलम्, ज्येष्ठा, आर्द्रा, आश्लेषा
	2. मिश्रनक्षत्राणि – विशाखा, कृत्तिका
	3. ध्रुवनक्षत्राणि–उत्तराफल्गुनी उत्तराषाढा उत्तराभाद्रपदा रोहिणी
	4. उग्रनक्षत्राणि – पूर्वाफल्गुनी पूर्वाषाढा पूर्वाभाद्रा भरणी मघा
करणम्	विष्टिकरणम् (भद्रा)
योगः	व्यतीपातः (पातः, महापातः)

६.५.१ वसिष्ठादीनां विशेषमतानि

आचार्यः रामदैवज्ञः धनप्रयोगे निषिद्धनक्षत्रादीन् यया रीत्या प्रतिपादयति सा एव रीतिः स च क्रमः वसिष्ठचार्येणापि पूर्वं प्रोक्तः आसीत्। वसिष्ठाचार्याणां मते उपप्लवस्य अर्थात् ग्रहणस्य कश्चन विशेषः आसीत्। वसिष्ठाचार्यः प्रतिपादयति –

"ध्रुवोग्रसाधारणदारुणार्क्षे निक्षिप्तमर्थं च तथा प्रनष्टम्।
चौरैर्हृतं दत्तमुपप्लवे वा विष्ट्यां च पाते न च लभ्यते तत्॥

अर्थात् ध्रुवसंज्ञकेषु उग्रसंज्ञकेषु साधारणसंज्ञकेषु दारुण(तीक्ष्ण)संज्ञकेषु च नक्षत्रेषु निवेशितं नष्टम् चौरैर्हृतं च धनं नष्टं भवति तच्च पुनः न लभ्यते। तद्वत् उपप्लवे = ग्रहणकाले, विष्ट्यां = भद्रानामके करणे व्यतीपातयोगे चापि निवेशितं धनं विनष्टमेव भवति।

एवं प्रकारेण वसिष्ठवचनात् इदमेव सिद्ध्यति यत् ग्रहणकाले यद्यपि जप-होम-ध्यानादिकं कृत्वा ब्राह्मणादिभ्य दानं तु कर्तव्यं किन्तु वाणिज्ये निवेशार्थं, प्रत्ययार्थं स्वेष्टसमीपे स्थापनादिकं च कल्याणाय न भवति।

६.६ जलाशयखननस्य नृत्यारम्भस्य च मुहूर्ताः

"जलमेव जीवनम्" इति सुप्रसिद्धा काचित् उक्तिः। प्रत्येकं जीवस्य प्राथमिकावश्यकतासु जलमपि प्रधानम्। अतः पक्षिणः पशवः मानवाश्च आदिकालात् एव जलयुक्ते क्षेत्रे वासम् अकुर्वन्। सम्प्रति अपि मानवस्य प्रत्येकम् आवश्यकतायाः पूर्तये जलं प्रमुखमेव अतः प्राचीनकालात् एव भारतीयपरम्परायां गृहनिर्माणात् प्राक् कूपखननस्य परम्परा विद्यते। पूर्वतनाः राजानः जलाशयादीनां निर्माणं कृत्वा वापी-कूप-तडागादीनां च जीर्णोद्धारं कृत्वा यशोवर्धनं पुण्यार्जनं च कुर्वन्ति स्म।

अन्यच्च सर्वस्मिन् स्थले अपि खनिते कूपे सर्वदा जलोपलब्धिः न सम्भवति, जले प्राप्तेऽपि शीघ्रमेव शुष्कता इत्यादयः क्लेशाः दृश्यन्ते। अतः एतादृक्लेशानां निवारणार्थम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उत्तमेषु कूपादिखननयोग्यनक्षत्रेषु जलाशय-कूप-तडागादीनां निर्माणं कल्याणाय भवति। तानि नक्षत्राणि आचार्यैः एवं प्रकारेण प्रोक्तानि -

''मित्रार्कध्रुववासवाम्बुपमघातोयान्त्यपुष्येन्दुभिः
पापैर्हीनबलैस्तनौ सुरगुरौ ज्ञे वा भृगौ खे विधौ।
आप्ये सर्वजलाशयस्य खननं''।

पदच्छेदः - मित्रः, अर्कः, ध्रुवम्, वासवम्, अम्बुपः, मघा, तोयम्, अन्त्यम्, पुष्यम्, इन्दुभिः, पापैः, हीनबलैः, तनौ, सुरगुरौ, ज्ञे, वा, भृगौ, खे, विधौ, आप्ये, सर्व, जलाशयस्य, खननम्।

अन्वयः - मित्रार्कध्रुववासवाम्बुपमघातोयान्त्यपुष्येन्दुभिः, हीनबलैः पापैः, तनौ सुरगुरौ ज्ञे वा, खे भृगौ, आप्ये विधौ सर्वजलाशयस्य खननं शुभम्।

प्रतिपदार्थः - मित्रः = अनुराधानक्षत्रम्, अर्को = हस्तनक्षत्रम्, ध्रुवम् = ध्रुवसंज्ञकनक्षत्राणि (उत्तराफल्गुनी-उत्तराषाढा-उत्तराभाद्रा-रोहिण्यः), वासवम् = धनिष्ठानक्षत्रम्, अम्बुपः = शतभिषा, मघा = मघानक्षत्रम्, तोयम् = पूर्वाषाढानक्षत्रम्, अन्त्यं = रेवतीनक्षत्रम्, पुष्यः, इन्दुभं = मृगशिरानक्षत्रम्, एतैः, हीनबलैः = बलरहितैः, पापैः = पापग्रहैः, तनौ = लग्ने, सुरगुरौ = बृहस्पतौ, ज्ञे = बुधे वा, खे = लग्नात् दशमस्थाने, आप्ये = जलचरराशौ, विधौ = चन्द्रे, सति सर्वजलाशयस्य = सर्वविधजलाशयस्य तन्नाम वापी-कूप-तडागादीनां, खननं = निर्माणं, शुभम् = हितकरं भवति।

भावार्थः - जलाशयखननं कस्मिन् काले प्रशस्तम् इति विचार्यमाणे आचार्याः रामदैवज्ञाः विविधनक्षत्राणां लग्नानां च वर्णनम् अकुर्वन्। तत्र जलाशयखननार्थं नक्षत्राणां लग्नस्य च प्रामुख्यं प्रकल्पितम् आचार्यैः। जलाशयखनने प्रशस्तनक्षत्राणि प्रोक्तानि। यथा -

अनुराधा-हस्त-रोहिणी-उत्तराफल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-धनिष्ठा-शतभिषक्-पूर्वाषाढा-रेवती-पुष्य-मृगाशिरसः। एतेषु नक्षत्रेषु कृतं जलाशयखननं न केवलं कल्याणकरं अपितु तत्र न कदापि जलाभावः भवति न च दुर्भिक्षादिकम्। अतः पूर्वाक्तेषु नक्षत्रेष्वेव जलाशय-कूप-तडागादीनां खननं निर्माणं च कर्तव्यम्।

६.६.१ श्रीपत्यादीनाम् एतद्विषयक-मतानि

यथा आचार्याः रामदैवज्ञाः मुहूर्तचिन्तामणिग्रन्थे कूपारम्भादिमुहूर्तविषये विवेचनम् अकुर्वन् तथैव वसिष्ठ-श्रीपत्यादयः अपि अनेके पूर्वाचार्याः जलाशय-कूप-तडागादिखननमुहूर्तान् विस्तारपूर्वकम् अवर्णयन्। अस्मिन् विषये आचार्यः श्रीपतिः प्रतिपादयति -

''हस्तः पुष्यो वासवं वारुणं च मैत्रं पित्र्यं त्रीणि चैवोत्तराणि।
प्राजापत्यं चापि नक्षत्रमाहुः कूपारम्भे श्रेष्ठमाद्या मुनीन्द्राः॥''

अत्र हस्त-पुष्य-धनिष्ठा-शतभिषा-अनुराधा-रोहिणी-उत्तरात्रीणि नक्षत्राणि एव कूपारम्भार्थं शुभानि श्रेष्ठानि च प्रोक्तानि। यद्यपि आचार्यः श्रीपतिः अपि एतत् मुनीन्द्रवचनम् अर्थात् पूर्वजानां मुनिश्रेष्ठानाम् इदं वचनम् इत्यङ्गीकरोति तथापि इदं वचनं रामदैवज्ञानां सममेव। अतः वास्तविकतायाम् इमानि नक्षत्राणि जलाशयादिखननार्थं शुभानि एव।

अनेनैव प्रकारेण वसिष्ठः अपि जलाशयस्य प्रारम्भणार्थं मुहूर्तान् निर्दिशति। यथा -

''मैत्रेन्दुपौष्णोत्तररोहिणीषु देवेज्यवारीश्वरवारिभेषु।
प्रारम्भणं सर्वजलाशयानां कार्यं सितेन्द्वंशकवारलग्ने॥''

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वसिष्ठाचार्यः अपि तानि एव नक्षत्राणि जलाशयखननार्थं प्रशस्तानि इति अङ्गीकरोति यानि अस्माभिः पूर्वं पठितानि। जलाशयेषु अपि कूप-तडाग-वापी-सर-इत्यादिभेदेन प्रकारान्तराणि यद्यपि सन्ति तथापि आचार्यरामदैवज्ञैः उक्तानि त्रयोदशनक्षत्राणि एव अन्येषाम् आचार्याणाम् अपि सम्मतानि सन्ति।

६.६.२ जलाशयखनने लग्नविचारः

एतावत्पर्यन्तं जलाशयखनने शुभनक्षत्राणां चर्चा विस्तारपूर्वकं जाता एव। तत्र न केवलम् आचार्याणां रामदैवज्ञानाम् अपि तु आचार्यश्रीपतेः, वसिष्ठाचार्याणां च मतमपि ज्ञातम्। न केवलं नक्षत्रज्ञानेन एव जलाशयादिनिर्माणस्य मुहूर्तज्ञानं पूर्णं भवति अपितु लग्नविचारः अपि अत्र प्रमुखरूपेण करणीयः। तद्विषये मुहूर्तचिन्तामणौ उच्यते - यत् यस्मिन् समये पापग्रहाः निर्बलाः स्युः, लग्ने गुरोः बुधस्य च स्थितिः भवति, दशमस्थाने शुक्रस्य जलचरराशौ च चन्द्रस्य स्थितिः भवति, तस्मिन् काले मुहूर्ते वा जलाशय-वाणी-कूप-तडागादीनां खननं कल्याणप्रदं भवति। यथा उक्तं रामदैवज्ञेन -

"पापैर्हीनबलैस्तनौ सुरगुरौ ज्ञे वा भृगौ खे विधौ।
आप्ये सर्वजलाशयस्य खननं ..... शुभम्॥"

अयं विशिष्टः कश्चन योगः। अत्र जलचरराशयः भवन्ति कर्क-मकर-कुम्भ-मीनाः। एतेषु जलचरराशिषु स्वयं जलीयः ग्रहः चन्द्रः तिष्ठति चेत् अवश्यं जलसम्बद्धकार्याणि सिद्धयन्ति।

६.६.३ मतान्तराणि

यथा सर्वेषु शुभकार्येषु संस्कारेषु च लग्नविचारः अत्यन्तं प्रामुख्येन क्रियते तथैव जलाशयखननमुहूर्तानां विवेचने बहवो हि आचार्याः स्व-स्वमतानि प्राकटयन्। मुहूर्तचिन्तामणिग्रन्थे पीयूषधाराटीकाकारः अन्येषां प्राक्तानानाम् आचार्याणां ऋषीणां च मतानि संग्रहीतवान् अस्ति। तद्यथा कश्यपमुनिः जलाशयखनने लग्नविचारम् एवं प्रकारेण प्रतिपादयति -

"गुरौ ज्ञे वा लग्नगते शुक्रे कर्मगते विधौ।
आप्यभे जलकार्याणामारम्भः सिद्धिदः स्मृतः॥"

कश्यपाचार्याणां मतेन अपि जलकार्याणाम् अर्थात् जलाशय-कूप-तडागादीनां निर्माणार्थम् अयमेव योगः प्रशस्तः यः रामदैवज्ञेन अपि पूर्वं प्रोक्तः। न केवलम् एतावदेव अपितु रत्नमालाग्रन्थे अपि सर्वविधतोयाश्रयाणां अर्थात् सर्वप्रकारकानां जलाश्रयाणां कूपतडागादीनां निर्माणार्थं लग्ने गुरुबुधयोः, दशमे शुक्रस्य, जलचरराशिषु चन्द्रस्य स्थितिः एवं क्रूराणां निर्बलत्वस्थित्या उत्पन्नः योगः अत्यन्तं शुभः प्रोक्तः। यथा -

"लग्ने जीवे ज्ञेऽथवा दुर्बलैश्च क्रूरैः शुक्रे चापि मेषूरणस्थे।
आप्ये चन्द्रे सर्वतोयाश्रयाणामारम्भाः स्युः सिद्धये निर्विकल्पम्॥"

दीपिकाकारस्तु 'शुभवारयोगतिथिषु' इति वाक्यं संयोज्य विशेषं किमपि प्रतिपादयति। यथा -

"पुष्ये मित्रकरोत्तरस्ववरुणब्रह्माम्बुपित्र्येन्दुभिः
शस्तेऽर्के शुभवारयोगतिथिषु क्रूरेष्ववीर्येषु च।
पुष्टेन्दौ जलराशिगे दशमगे शुक्रे शुभांशादये
प्रारम्भः सलिलाशयस्य शुभदो जीवेन्दुपुत्रोदये॥"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्रापि तानि एव नक्षत्राणि प्रामुख्येन प्रोक्तानि यानि रामदैवज्ञाः प्रत्यपादयन्। किन्तु केचन विशिष्टांशाः दीपिकाकारेण प्रोक्ताः यथा जलाशयादीनां निर्माणं ''शस्तेऽर्के'' ''शुभवारयोगतिथिषु'' जीवेन्दुपुत्रोदये'' च करणीयम्। अर्थात् केवलं नक्षत्राणाम् एव शुभत्वं न अवलोकनीयम् अपि तु वाराः, योगाः तिथयः ग्रहाश्चापि शुभाः भवन्ति चेत् जलाशयखननं हितकरं शुभं च भविष्यति।

स्पष्टार्थस्य अवबोधार्थं जलाशयखननमुहूर्तानां सारिणी अत्र प्रस्तूयते -

(जलाशयखननमुहूर्तसारिणी)

नक्षत्राणि	अनुराधा-हस्त-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रा-धनिष्ठा - शतभिषक्-मघा-पूर्वाषाढा-रेवती-पुष्य-मृगशिरा-रोहिणी
लग्नानि	पापग्रहाः (सूर्य-कुज-शनयः) निर्बलाः स्युः लग्ने बुधः गुरुः वा लग्नात् दशमे शुक्रः कर्क-मकर-कुम्भ-मीनेषु चन्द्रस्य स्थितिः

६.६.४ नृत्यारम्भमुहूर्तः

''नृत्यारम्भः'' इत्यस्य पदस्य सामान्यतः अर्थद्वयं स्पष्टं भवति।

१. नृत्याभ्यासस्य आरम्भः

२. राजगृहादिषु नृत्यप्रदर्शनस्य आरम्भः

अत्र ये नृत्यारम्भमुहूर्ताः प्रतिपाद्यन्ते ते तु उभयविधे नृत्यारम्भे अपि स्वीकर्तव्याः। अर्थात् प्रथमतः नृत्याभ्यासस्य आरम्भार्थम् अपि इमे मुहूर्ताः शुभाः, प्रथमतः विशिष्टकार्यक्रमेषु सभासु वा मृत्युप्रदर्शनार्थम् अपि इमे मुहूर्ताः शुभदा एव।

आचार्यः अत्र न केवलं नृत्यारम्भार्थं प्रशस्तनक्षत्राणि प्रतिपादयति अपितु शुभलग्नं, विविधस्थानेषु स्थितग्रहाणां स्थित्या शुभमुहूर्तान् चापि प्रतिपादयति। यथा -

''.....व्यमभोमघैः सेन्द्रभैस्तैर्नृत्यं हिबुके शुभैस्तनुगृहे ज्ञेऽब्जे ज्ञराशौ शुभम्।''

पदच्छेदः - व्यमभो, मघैः, सेन्द्रभैः, तैः, नृत्यम्, हिबुके, शुभैः, तनु, गृहे, ज्ञे, अब्जे, ज्ञ, राशौ, शुभम्।

अन्वयः - व्यमभोमघैः सेन्द्रभैः तैः, हिबुके (स्थितैः) शुभैः तनुग्रहे ज्ञे (सहिते) अब्जे ज्ञराशौ नृत्यं शुभम्।

प्रतिपदार्थः - व्यमभोमघैः = विगतैः अम्भोमघैः अर्थात् पूर्वाषाढामघारहितैः, सेन्द्रभैः = इन्द्रभसहितैः, (इन्द्रभं ज्येष्ठा नक्षत्रं भवति) ज्येष्ठासहितैः इत्यर्थः, तैः = मित्रार्कध्रुववासवाम्बुपान्त्यपुष्येन्दुज्येष्ठानक्षत्रे (नृत्यं शुभं भवति), हिबुके = लग्नात् चतुर्थे स्थाने, (स्थितैः), शुभैः = शुभग्रहैः, तनुग्रहे = लग्ने, ज्ञे = बुधे, अब्जे = चन्द्रे, ज्ञराशौ = मिथुनकन्यास्थे (सति) नृत्यम् = नृत्यारम्भणम्, शुभम् = कल्याणप्रदं भवति।

भावार्थः - जलाशयखननस्य मुहूर्तकथनसमये यानि नक्षत्राणि आचार्यैः रामदैवज्ञैः प्रतिपादितानि तेषु नक्षत्रेषु पूर्वाषाढां मघां च विहाय ज्येष्ठां संयोज्य सर्वाणि अपि

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नक्षत्राणि नृत्यारम्भार्थम् अपि स्वीकर्तव्यानि। तानि अनुराधा-हस्त-रोहिणी-उत्तरात्रय-धनिष्ठा-शतभिषक्-रेवती-पुष्य- मृगशिरा-ज्येष्ठानक्षत्राणि सन्ति। एतानि नक्षत्राणि अतिरिच्य लग्नविचारः अपि विशेषरूपेण अत्र कृतः वर्तते। यथा - लग्नात् चतुर्थस्थाने शुभग्रहाणां स्थितिः, लग्ने बुधग्रहस्य स्थितिः, बुधस्य राशौ मिथुने कन्यायां वा चन्द्रस्य स्थितिः प्रथमतः नृत्याभ्यासारम्भार्थं, प्रथमनृत्यप्रदर्शनार्थं च अत्यन्तं प्रशस्ता भवति। अतः नक्षत्रविचारं लग्नविचारं च कृत्वा यः नृत्याभ्यासारम्भं करोति अथवा नृत्यप्रदर्शनारम्भं करोति सः निश्चयेन स्वकर्मणि साफल्यम् प्राप्स्यति। अभ्यासकाले नृत्यप्रदर्शनकाले च न कापि बाधा भवति इति अनुभववेद्यम्।

६.६.५ वसिष्ठादीनाम् आचार्याणां मतानि

सर्वेऽपि ज्योतिष्काः मुहूर्तग्रन्थेषु स्व-स्व अनुभवानुसारं पूर्वाचार्याणां च कथनानुसारं मुहूर्तान् लग्नविचारान् च प्रतिपादितवन्तः। तेषाम् आचार्याणां विचारेषु साम्यम् अपि भवति किन्तु काचित् भिन्नता अपि अवश्यं भवति। येषां विश्लेषणं कृत्वा एकं निश्चितं सिद्धान्तं प्रतिपादयितुं शक्नुमः। नृत्यारम्भमुहूर्तविषयेऽपि बहवो हि आचार्याः स्वमतानि प्रत्यपादयन्। तेषु वसिष्ठाचार्यः उल्लिखति -

"तिस्रोत्तरामित्रगुरुश्रविष्ठाहस्तेन्द्रवारीश्वरपौष्णभेषु।
संगीतनृत्यादिसमस्तकर्म कार्यं विभौमार्कजवासरेषु॥" इति।

यद्यपि वसिष्ठाचार्याणां मतेन अपि पूर्वं कथितानि नक्षत्राणि एव प्रशस्तानि तथापि वाराणां विषये नूतनमेकं चिन्तनम् आचार्यैः प्रतिपादितम्। वसिष्ठमतेन नृत्यादिकार्याणाम् आरम्भः शनि-भौमवासरौ त्यक्त्वा अन्येषु सौम्यवासरेषु एव करणीयः। न केवलं नृत्यारम्भः अपितु सङ्गीतकलायाः अभ्यासारम्भः अपि पूर्वोक्तनक्षत्रेषु सौम्यवासरेषु च करणीय इत्यर्थः।

आचार्यश्रीपतेः अपि अयमेव आशयः। तद्यथा -

"हस्तो पुष्यो वासवं चानुराधा ज्येष्ठा पौष्णं वारुणं चोत्तराश्च।
पूर्वाचार्यैः कीर्तितश्चन्द्रवर्ती नृत्यारम्भे शोभनोऽयं भवर्गः॥" इति।

अत्र नक्षत्राणाम् अयं हस्त-पुष्यादिसमूहः नृत्यारम्भणार्थम् अतिशोभनः उच्यते। नृत्यारम्भस्य उत्तमलग्नविचारे आचार्यः रामदैवज्ञः तु चतुर्थस्थाने शुभग्रहाणां स्थितिम्, लग्ने बुधग्रहस्य, मिथुन-कन्याराश्योः स्थाने चन्द्रस्य स्थितिं शुभं मनुते। परन्तु आचार्यः कश्यपः रत्नमालाकारश्च किञ्चित् भेदेन अमुम् एव लग्नविचारं प्रतिपादयतः।

कश्यपस्य मतानुसारं बुधग्रहस्य लग्ने स्थितिः, मिथुन-कन्याराश्योरन्यतरे चन्द्रस्य स्थितिः, चतुर्थभावे स्थितानां शुभग्रहाणां चन्द्रोपरि दृष्टिवशात् यः उत्कृष्टः योगः भवति तत्र नृत्यारम्भः शुभः भवति इति। अत्र विशेषः अयमेव यत् कश्यपाचार्यः न केवलं चतुर्थस्थाने शुभग्रहाणां स्थितिं वदति अपितु मिथुन-कन्ययोः अन्यतरे स्थितः चन्द्रः चतुर्थभावस्थैः शुभ्रग्रहैः वीक्षितः यदि भवति तर्हि अयं शुभलग्नविचारः पूर्णः भवति। अत एव प्रायः पीयूषधाराटीकाकारः अपि आचार्याणां रामदैवज्ञानां कथनस्य व्याख्यानावसरे "लग्नात् चतुर्थस्थाने स्थितै शुभग्रहैः, 'वीक्षिते' इति अध्याहारः" इति कथयन् 'वीक्षित' इति पदम् अत्र निवेषणीयम् इति प्रतिपादयति, यच्च कश्यपमतेन स्पष्टमपि भवति। रत्नमालाकारेणापि अयमेव विषयः प्रतिपाद्यते। यथा -

"बुधे विलग्ने शशिनि ज्ञराशौ शुभवीक्षिते।
हिबुकस्थैः शुभैर्नाट्यप्रारम्भः सद्भिरिष्यते॥"

अत्र नृत्यशब्दस्य स्थाने नाट्यपदस्य प्रयोगात् इदमवगम्यते यत् न केवलं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नृत्यस्य अपितु नाट्यसङ्गीतादीनां विविधकलानां शुभारम्भार्थमपि अयमेव लग्नविचारः नक्षत्रविचारश्च प्रशस्तः भवति इति।

नृत्यारम्भार्थं शुभमुहूर्तानां स्पष्टतया अवबोधार्थं काचित् सारिणी अत्र प्रस्तूयते -

(नृत्यारम्भमुहूर्तसारिणी)

नक्षत्राणि	अनुराधा-हस्त-रोहिणी-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रा-धनिष्ठा-शतभिषक्-रेवती-पुष्य-मृगशिरा-ज्येष्ठाः।
लग्नानि	लग्ने बुधग्रहस्य स्थितिः, लग्नात् चतुर्थे शुभग्रहाणां स्थितिः, मिथुन-कन्ययोः चन्द्रग्रहस्य स्थितिः।

बोधप्रश्नाः

११. घनप्रयोगे किं करणं निषिध्यते ?

१२. व्यतीपातयोगे दत्तस्य निवेशितस्य वा द्रव्यस्य फलं किम्?

१३. मिश्रसंज्ञकनक्षत्रेषु कानि नक्षत्राणि अन्तर्भवन्ति?

१४. जलाशयखननार्थं कति शुभनक्षत्राणि रामदैवज्ञैः कथितानि?

१५. कूप-तडागादीनां निर्माणार्थं लग्नात् दशमस्थाने कः ग्रहः शुभः?

१६. जलचरराशयः के सन्ति?

१७. नृत्यारम्भार्थं लग्ने कः ग्रहः प्रशस्तः?

१८. बुधग्रहस्य राशयः के सन्ति?

१९. 'इन्द्रभम्' कस्य नक्षत्रस्य अपरं नाम?

६.७ सारांशः

अस्मिन् पाठे नक्षत्रसम्बन्धिनः मुख्यरूपेण षड्विषयाः विवेचिताः -

१. खड्गादिशस्त्रधारणमुहूर्ताः।

२. शय्यासनादीनां प्रथमभोगस्य मुहूर्ताः।

३. अन्धाक्षादिनक्षत्राणि फलानि च।

४. घनप्रयोगे निषिद्धनक्षत्राणि।

५. जलाशयखननस्य मुहूर्ताः।

६. नृत्यारम्भस्य मुहूर्ताः।

अत्र सर्वप्रथमतः खड्गादिशस्त्राणां धारणस्य मुहूर्तः प्रतिपादितः। तत्रादौ तिथिशु रिक्ततीथीन् विहाय १-२-३-५-६-७-८-१०-११-१२-१३-१५ तिथयः, रवि-गुरु-शुक्रवासराः, मृगशिरा-रेवती-चित्रा-अनुराधा-उत्तराफल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-हस्त-अश्विनी-पुष्य-पुनर्वसु-ज्येष्ठा-विशाखा इत्येतानि चतुर्दशनक्षत्राणि, स्थिरसंज्ञकेषु वृष-सिंह-वृश्चिक-कुम्भराशिषु च चन्द्रस्य स्थितिः इति एते मुहूर्ताः खड्ग-कृपाण-धनु-छुरिकादीनां शस्त्राणां धारणार्थम् अत्यन्तं शुभाः प्रशस्ताः च प्रोक्ताः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शय्यासनादीनाम् उपभोगार्थं प्रशस्तानि नक्षत्राणि अपि चतुर्दश एव प्रोक्तानि आचार्यैः। यथा - उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपद्-रोहिणी-मृगशिरा-रेवती-चित्रा-अनुराधा-हस्त-अश्विनी-पुष्य-श्रवण-भरणी-पुनर्वसव इत्येतानि। एतेषु चतुर्दशनक्षत्रेषु शय्या-आसनादीनां प्रथमः उपयोगः हितकरः शुभश्च प्रोक्तः।

तदनन्तरं विनष्टस्य धनस्य लाभार्थं प्रतिप्राप्त्यर्थं वा उपयोगीनि अन्धाक्षादिसंज्ञकनक्षत्राणि उच्यन्ते। अन्धाक्षसंज्ञकनक्षत्राणि सप्तसंख्याकानि सन्ति। तानि धनिष्ठा-पुष्य-रोहिणी-पूर्वाषाढा-विशाखा-उत्तराफाल्गुनी-रेवत्यः। मन्दाक्षसंज्ञकानि नक्षत्राणि हस्त-उत्तराषाढा-अनुराधा-शतभिषक्-आश्लेषा-अश्विनी-मृगशिराः सन्ति। आर्द्रा-मघा-पूर्वाभाद्रपदा-चित्रा-ज्येष्ठा-अभिजित्-भरण्य-इत्येतानि मध्याक्षसंज्ञकनक्षत्राणि सन्ति। स्वाती-पुनर्वसु-श्रवण-कृत्तिका-उत्तराभाद्रपदा-मूल-पूर्वाफल्गुन्य इत्येतानि सुलोचनसंज्ञकनक्षत्राणि भवन्ति। अन्धाक्षसंज्ञकेषु नक्षत्रेषु नष्टस्य धनस्य वस्तुनः वा शीघ्रं प्रतिप्राप्तिः भवति। मन्दाक्षसंज्ञकनक्षत्रेषु नष्टवस्तुनः लाभः प्रयत्नपूर्वकं भवति। मध्याक्षनक्षत्रेषु नष्टवस्तूनां दूरदेशे श्रवणं भवति। सुलोचनसंज्ञकनक्षत्रेषु विनष्टधनस्य वस्तुनः वा पुनःप्राप्तिः श्रवणं च न भवति।

विनष्टार्थस्य पुनःप्राप्त्यर्थं नक्षत्रकथनानन्तरं केषु नक्षत्रेषु धनस्य व्यवहारः प्रयोगश्च न कर्तव्यः इत्यपि विविच्यते। धनप्रयोगार्थं पञ्चदशनक्षत्राणि निषिद्धानि सन्ति। तानि च मूल-ज्येष्ठा-आर्द्रा-आश्लेषा-विशाखा-कृत्तिका-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणी-पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा-भरणी-मघाः सन्ति। अन्यच्च विष्टिकरणे व्यतीपातयोगे च धनप्रयोगः तद्धनस्य नाशाय एव कल्पते।

ततश्च जलाशयखननमुहूर्तः कथितः। जलाशयखननार्थं अनुराधा-हस्त-उत्तराफल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणी-धनिष्ठा-शतभिषक्-मघा-पूर्वाषाढा-रेवती-पुष्य-मृगशिरा-इत्येतानि त्रयोदशनक्षत्राणि, पापग्रहाणां निर्बलत्वं, लग्ने गुरुबुधयोः स्थितिः, लग्नात् दशमस्थाने शुक्रस्य स्थितिः, जलचरराशिषु च चन्द्रस्य स्थितिः अत्यन्तं शुभा प्रोक्ता।

नृत्य-सङ्गीत-नाट्यानां शुभारम्भार्थं द्वादशनक्षत्राणि अत्यन्तं प्रशस्तानि सन्ति। तेषु नक्षत्रेषु एकादशनक्षत्राणि जलाशयखननमुहूर्ते अपि प्रतिपादितानि। तानि हि अनुराधा-हस्त-रोहिणी-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-धनिष्ठा-शतभिषक्-रेवती-पुष्य-मृगशिरा-धनिष्ठाः। नक्षत्रैः सह लग्नात् चतुर्थे स्थाने शुभग्रहाणां स्थितिः, लग्ने बुधग्रहस्य स्थितिः, मिथुनकन्ययोः चन्द्रस्य च स्थितिरपि नृत्यारम्भार्थं प्रशस्ता प्रोक्ता।

एवं प्रकारेण अस्मिन् पाठे मुख्यतः ग्रन्थस्य पञ्चश्लोकानां व्याख्या कृता। अन्यैः आचार्यैः तत्तद्विषये उक्तानि वचनानि अपि विवेचितानि।

६.८ शब्दावली

१.	सन्धार्याः	-	सम्यक्तया धारणीयाः।
२.	इष्वसनम्	-	धनुः (इषवः = बाणाः, अस्यन्ते = क्षिप्यन्ते, अतः इषवः अस्यन्ते अनेनेति इष्वसनम्)।
३.	असिपुत्री	-	छुरिका।
४.	भोगः	-	उपभोगः प्रथमोपयोगः वा।
५.	अर्यमा	-	उत्तराफल्गुनी-नक्षत्रम्।
६.	चान्द्रं	-	मृगशिरानक्षत्रम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

७.	श्रुत्याप्ती	–	न श्रवणं न प्राप्तिः च।
८.	द्रव्यम्	–	सुवर्ण-रजतादिकम्।
९.	विष्टिः	–	भद्रानामकं करणम्।
१०.	पातः	–	व्यतीपातनामकः योगः।
११.	वासवम्	–	धनिष्ठानक्षत्रम्।
१२.	तनौ	–	लग्नभावे
१३.	ज्ञे	–	बुधे।
१४.	विधौ	–	चन्द्रे।
१५.	आप्ये	–	जलचरराशौ।
१६.	हिबुके	–	चतुर्थभावे।
१७.	अब्जे	–	चन्द्रे।

६.९ सन्दर्भग्रन्थः

१. मुहूर्तचिन्तामणिः, श्रीमद्रामदैवज्ञविरचिता, (पीयूषधारा व्याख्योपेता), मोती लाल बनारसी दास, दिल्ली।

२. मुहूर्तचिन्तामणिः, श्रीमद्रामदैवज्ञविरचिता, हिन्दीव्याख्याकारः - विन्ध्येश्वरी-प्रसादद्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२।

६.१० सहायकग्रन्थाः

१. मुहूर्तमार्त्तण्डः, श्रीनारायणदैवज्ञविरचितः, चौखम्बा संस्कृत संस्थान, वाराणसी।

२. अमरकोशः (नामलिङ्गानुशासनम्), चौखम्बा सुरभारती प्रकाशन, वाराणसी।

६.११ बोधप्रश्नोत्तराणि

१. रिक्ता।

२. गुरुः।

३. खड्गादीनाम्।

४. मृगशिरा-रेवती-चित्रा-अनुराधाः।

५. अन्धाक्षसंज्ञा।

६. हस्तनक्षत्रस्य।

७. सप्त।

८. मध्याक्षनक्षत्रेषु।

९. प्रयत्नेन लाभः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१०. सुलोचनसंज्ञकनक्षत्रेषु।

११. विष्टिकरणम्।

१२. द्रव्यनाशः।

१३. विशाखा कृत्तिका च।

१४. त्रयोदशनक्षत्राणि।

१५. शुक्रः।

१६. कर्क-मकर-कुम्भ-मीनाः।

१७. बुधः।

१८. मिथुन-कन्ये।

१९. ज्येष्ठानक्षत्रस्य।

६.१२ अभ्यासप्रश्नाः

१. खड्गादिधारणे शुभतिथीन् वर्णयत।

२. शय्यादीनाम् उपभोगे प्रशस्तनक्षत्राणि लिखत।

३. अन्धाक्षसंज्ञकनक्षत्राणि सफलं प्रतिपादयत।

४. घनप्रयोगे निषिद्धनक्षत्राणि, करणं योगं च लिखत।

५. जलाशयखननमुहूर्तं प्रतिपादयत।

६. रामदैवज्ञमतेन नृत्यारम्भमुहूर्तं विवेचयत।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्तमपाठः - 'कृषिकर्मसम्बन्धिमुहूर्त्ताः'

पाठसंरचना

७.१. प्रस्तावना
७.२. उद्देश्यम्
७.३. सेवकस्य स्वामिसेवायां मुहूर्तविचारः
  ७.३.१. कश्यपादीनां मतानि
७.४. द्रव्यप्रयोगऋणग्रहणमुहूर्तविचारः
७.४.१. विविधग्रन्थानां मतानि
७.५. हलप्रवहणमुहूर्तविचारः
  ७.५.१. नारदादि-आचार्याणां मतानि
  ७.५.२. लग्नशुद्धिविमर्शः
  बोधप्रश्नाः
७.६. बीजोप्तिमुहूर्तफणिचक्रहलचक्राणि।
  ७.६.१. रत्नमालादिग्रन्थानां मतानि
  ७.६.२. बीजाप्तौ फणिचक्रविमर्शः
  ७.६.३. हलप्रवहणविमर्शः
  ७.६.४. हलाकृतिविमर्शः
  ७.६.५. बीजवपने राहुचक्रम्
७.७. शिरोमोक्षणविरोकादि धर्मक्रियामुहूर्ताः
  ७.७.१. ज्योतिःसागरादि ग्रन्थानां मतानि
  बोधप्रश्नाः
७.८. सारांशः
७.९. शब्दावली
७.१०. सहायकग्रन्थाः
७.११. सन्दर्भः
७.१२. बोधप्रश्नोत्तराणि
७.१३. अभ्यासप्रश्नाः

७.१ प्रस्तावना

प्रिय अध्येता !

सप्तमपाठेऽस्मिन् भवतः स्वागतम्। भवान् षष्ठे पाठे खड्गादिधारणं शय्याद्युपभोगं च अधीतवान्। अन्धकादि नक्षत्राणि धनप्रयोगे निषिद्धनक्षत्राणि च ज्ञातवान्। वशिष्ठदीनां मतानां विवेचनम् अकरोत्। कूपतडागमुहूर्ताणां विवेचनम् अपठत्। प्राचीनकाले स्वामिसेवकसम्बन्धस्य आरम्भार्थम् उत्तमं मुहूर्तम् जनाः पश्यन्ति स्म। स्वामिसेवायाम् मुहूर्तविचारम् अध्येष्यति। यथा गोव्याघ्रयोः सहजशत्रुता वर्तते तथा सर्वेषु अपि प्राणिषु योनिमैत्री नाम्ना सहजशत्रुमित्रसमादिसम्बन्धः अस्ति एव। योनिमैत्रीकूटं भवान् अत्र सूक्ष्मतया अध्येष्यति। ग्रहाणां मैत्रीमपि भवान् अधिगच्छति। विविधग्रन्थोक्तमतानां अध्ययनं करिष्यति। अन्नं ब्रह्म इति सर्वे जानन्ति। अतः अन्नमूलं कृषिः भवति। कृषिकर्मणि सफलताप्राप्त्यर्थं शुभाऽशुभमुहूर्तम् अधिगमिष्यति।

७.२ उद्देश्यम्

- सेवकस्य स्वामिसेवायां मुहूर्तविचारं कर्तुं समर्थो भविष्यति।
- कश्यपादीनां मतानि प्रतिपादयितुं प्रभविष्यति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

- ☞ द्रव्यप्रयोगऋणग्रहणमुहूर्तविचारपरिज्ञाने निपुणः भविष्यति ।
- ☞ विविधग्रन्थानां मतानां विवेचने सक्षमो भविष्यति।
- ☞ हलप्रवहणमुहूर्तविचाराणां परिज्ञाने पटुः भविष्यति।
- ☞ नारदादि-आचार्याणां मतानां परिशीलने दक्षः भविष्यति।
- ☞ लग्नशुद्धिविमर्शयितुं सक्षमो भविष्यति।
- ☞ बीजोप्तिमुहूर्तफणिचक्रहलचक्राणां परिज्ञाने समर्थो भविष्यति।
- ☞ रत्नमालादिग्रन्थानां मतानि वक्तुं शक्ष्यति।
- ☞ बीजाप्तौ फणिचक्रविमर्शे निपुणो भविष्यति।
- ☞ हलप्रवहणविधिनिरूपणे दक्षः भविष्यति।
- ☞ हलाकृति वक्तुं शक्ष्यति।
- ☞ बीजवपने राहुचक्रलेखने सक्षमो भविष्यति।
- ☞ शिरोमोक्षणविरेकादिघर्मक्रियामुहूर्तानां कथने प्रवीणः भविष्यति।
- ☞ ज्योतिःसागरादिग्रन्थमतानां विवेचने पटुः भविष्यति।

७.३ सेवकस्य स्वामिसेवायां मुहूर्तविचारः-

प्रकृतिचैतन्ययोः संयोजनेन सृष्टिः भवति। नक्षत्राणि वासराश्च प्रकृत्या सम्बन्धिताः भवन्ति। अतः यस्य कस्यापि कर्मणः सफलतायै प्रकृत्यानुकूले समये भारतीयाः सुमुहूर्ते प्रारम्भं कुर्वन्ति स्म। राज्ञाम् अथवा समाजे श्रेष्ठजनानां सेवायां सुमुहूर्ते जनाः कार्यं प्रारभन्ते स्म। आधुनिककाले नूतन-आजीविकायां वेतनग्रहणादिकार्येषु मुहूर्तस्यास्य उपयोगः भवति। स एव मुहूर्त्तः तत्कर्मणे शुभकाल इति उच्यते।

क्षिप्रसंज्ञकनक्षत्रेषु, मैत्रसंज्ञकनक्षत्रेषु, सूर्यबुधगुरुशुक्रवासरेषु अन्यतमे वासरे सौम्यग्रहे लग्नस्थे रविः कुजः वा दशमे एकादशभावे वा स्थिते सति योनिमैत्रीकूटे राश्यधिपमैत्रीकूटे वा सेवकेन स्वामिनः सेवाकार्यारम्भः अनुकूलः शुभदः लाभप्रदो वा भवति। क्षिप्रसंज्ञकनक्षत्राणि अश्विनी-हस्त-पुष्य एतानि नक्षत्राणि भवन्ति। मैत्रसंज्ञकनक्षत्राणि मृगशिरा-रेवती-चित्रा-अनुराधा एतानि नक्षत्राणि भवन्ति। सूर्यबुधगुरुशुक्रवासरेषु अन्यतमे वासरे सौम्यग्राः लग्नगताः भवेयुः। बलीचन्द्रः पापरहितः बुधः गुरुः शुक्रः एते सौम्यग्रहः भवन्ति। अनन्तरं योनिमैत्री ज्ञातव्या। योनिमैत्री अस्मिन् एव ग्रन्थे विवाहप्रकरणे उल्लिखिता अस्ति। यथा-

"अश्विन्यम्बुपयोः हयो निगदितः स्वात्यर्कयोः कासरः।
सिंहो वस्वजपाद्भयोः समुदितो याम्यान्त्ययोः कुञ्जरः॥

मेषो देवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः।
स्याद् वैश्वाभिजितोस्तथैव नकुलश्चन्द्राब्जयोन्योरहिः॥

ज्येष्ठामैत्रभयोः कुरङ्ग उदितो मूलार्द्रयोः श्वा तथा॥

मार्जारोऽदितिसार्पयोरथ मघा योन्योस्तथैवोन्दुरुः।
व्याघ्रो द्वीशभचित्रयोरपि च गौरर्यम्णबुध्नर्क्षयोः
योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत्॥"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अश्विनीशतभिषज्-नक्षत्रयोः अश्वसंज्ञकयोनिः भवति। स्वातीहस्तयोः नक्षत्रयोः महिषसंज्ञकयोनिः भवति। धनिष्ठापूर्वाभाद्रपदयोः सिंहः, भरणीरेवत्योः गजः, पुष्यकृत्तिकयोः मेषः, श्रवणपूर्वाषाढयोः वानरः, उत्तराषाढ-अभिजितोः नकुलः, रोहिणीमृगशिरसोः सर्पः, ज्येष्ठा-अनुराधयोः हरिणः, मूलार्द्रयोः कुक्कुरः, पुनर्वसु-आश्लेषयोः मार्जारः, अथ मघापूर्वाफल्गुन्योः उन्दुरुः, विशाखाचित्रयोः व्याघ्रः, उत्तराफल्गुनी-उत्तराभाद्रपदयोः गौः, योनिः भवति।

नक्षत्रम्	योनिः
अश्विनी, शतभिषज्	अश्वः
हस्तः, स्वाती	महिषः
घनिष्ठा, पू.भाद्रपदा	सिंहः
भरणी रेवती	गजः
पुष्यः, कृत्तिका	मेषः
श्रवणः, पू.षाढा	कपिः
उ.षाढा, अभिजित्	नकुलः
मृगशिरा, रोहिणी	सर्पः
ज्येष्ठा, अनुराधा	हरिणः
मूलम्, आर्द्रा	श्वानः
पुनर्वसुः, आश्लेषा	मार्जारः
मघा, पू.फा	मूषकः
विशाखा, चित्रा	व्याघ्रः
उ.फा, उ.भा	गौः

योनिकूटस्योपयोगिता अग्रे लिख्यते। एकयोनौ जातानां मैत्री शुभदा भवति। भिन्नयोनिषु जातानां मध्यमफलं स्याद्। अरिभावे न मैत्री भवति। स्वामिसेवकयोः जन्मनक्षत्रयोः अनुसारं योनिकूटं परिशीलयेत्। सेवकस्य जन्मनक्षत्रस्य योनिः स्वामिनः जन्मनक्षत्रस्य योनिना समः स्यात् अथवा मैत्री भवेत् नो चेत् योनिकूटं शुभदं नास्ति इति ज्ञेयम्। यदि योनिकूटं सङ्गच्छते तर्हि एव स्वामिसेवकसम्बन्धः कार्यः। अपि च राश्यधिपानां मैत्री परिशीलनीया। राश्यधिपमैत्री कथं भवति? इति जिज्ञासायाम् उच्यते। द्वादशराशीनाम् अधिपाः वर्तन्ते। यदि स्वामिनः जन्मनक्षत्रराश्यधिपः सेवकस्य जन्मनक्षत्रराश्यधिपश्च मिथः मित्रे भवेतां तदा राश्यधिपमैत्री वर्तते इति ज्ञेया। राश्यधिपाः के? इति आदौ ज्ञातव्याः। मेषादीनां क्रमशः कुजः शुक्रः बुधः चन्द्रः रविः बुधः शुक्रः कुजः गुरुः शनिः शनिः गुरुश्च क्रमशः राश्यधिपाः भवन्ति। स्वामिनः जन्मनक्षत्रं यस्मिन् राशौ अन्तर्भवति सः राशिः जन्मराशिः भवति। तस्य राशेरधिपः जन्मराश्यधिपः भवति। तर्हि राश्यधिपानां ग्रहाणां मैत्री कथम् इति प्रश्नः उदेति। तदुक्तम् अस्मिन् ग्रन्थे विवाहप्रकरणे सप्तविंशति अष्टाविंशतितमे श्लोके यथा-

"मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ।
सौम्याश्चासौ समो विधोर्बुधरवी मित्रे न चास्य द्विषत्॥

© मुक्तस्वाध्यायपीठम्, गार्ष्ट्यसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शेषाश्चास्य समाः कुजस्य सुहृदश्चन्द्रेज्यसूर्याबुधः।
शत्रुः शुक्रशनी समौ च शशभृत् सूनोः सिताहस्करौ॥

मित्रे चास्य रिपुः शशी गुरुशनिक्ष्माजाः समा गीष्पतेः।
मित्राण्यर्ककुजेन्दवो बुधसितौ शत्रू समः सूर्यजः॥

मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ।
मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्यः समः॥''

सूर्यस्य भौमगुरुचन्द्राः मित्राणि, शुक्रशनी वैरिणौ एवं बुधः समः भवति। चन्द्रस्य मङ्गलगुरुशुक्रशनयः समा एव, बुधरवी मित्रे शत्रुः नास्ति। भौमस्य चन्द्रगुरुसूर्याः सुहृदः, बुधस्तु शत्रुः भवति। शुक्रशनैश्चरौ समौ, बुधस्य शुक्रसूर्यौ मित्रे, चन्द्रः शत्रुः, गुरुशनिभौमाः समाः। गुरोः रविकुजचन्द्राः मित्राणि, बुधसितौ शत्रू शनिः समः। कवेः शुक्रस्य बुधशनी मित्रे चन्द्रसूर्यौ शत्रू कुजगुरू समौ। शनेः शुक्रबुधौ मित्रे रविचन्द्रभौमाः शत्रवः गुरुः समः भवति।

एवं राश्यधिपग्रहाणां मित्रामित्रत्वं ज्ञातव्यम्। स्वामिसेवकयोः जन्मराश्यधिपयोः मित्रत्वे भाविफलं शुभं भविष्यति, अन्यथा चेत् अशुभमिति ज्ञेयम्। यथा जन्मराश्यधिपानां समत्वे भाविफलं सममिति ज्ञेयम्। जन्मराश्यधिपानां शत्रुत्वे भाविजीवने क्लेशः चिन्त्यः। जन्मसमये चन्द्रः यस्मिन् राशौ स्थितः सः राशिः जन्मराशिः भवति। जन्मकाले चन्द्रः यस्यां तारायां स्थितः सा जन्मतारा भवति। चन्द्रमनसोः सम्बन्धः वैदिककालादेव प्रसिद्धः अस्ति । तच्च ''चन्द्रमा मनसो जातः इति अतिप्रसिद्धम्''। पूर्णचन्द्रं दृष्ट्वा मनसः आह्लादः जायते एव। मनसः कारकत्वात् स्वामिसेवकयोः मनोमेलनं तयोः राश्यधिपग्रहसम्बन्धात् स्फुटं भवति।

क्षिप्रमैत्रनक्षत्रेषु, सूर्यबुधगुरुशुक्रवासरेषु, लग्नभावगतेषु सौम्यग्रहेषु, राश्यधिपमैत्र्यां, योनिसाम्ये सति स्वामिसेवाप्रारम्भार्थं सुसमयः भवति।

इत्थं, क्षिप्रसंज्ञकनक्षत्रेषु, मैत्रसंज्ञकनक्षत्रेषु, सूर्यबुधगुरुशुक्रवासरेषु अन्यतमे वासरे, सौम्यग्रहाणां लग्ने स्थित्या, रविः कुजः वा दशमे एकादशभावे वा स्थिते सति। योनिमैत्रीकूटे, राश्यधिपमैत्रीकूटे च। सेवकेन स्वामिनः सेवाकार्यारम्भः कर्तुं योग्यसमयः भवति। तदुक्तं यथा-

''क्षिप्रे मैत्रे वित्सितार्केज्यवारे सौम्ये लग्नेऽर्के कुजे वा खलाभे।
योनेर्मैत्र्यां राशिपश्चापि मैत्र्यां सेवा कार्या स्वामिनः सेवकेन॥''

पदच्छेदः- क्षिप्रे मैत्रे वित्सित अर्क इज्य वारे सौम्ये लग्ने अर्के कुजे वा ख लाभे योनेः मैत्र्यां राशिपः चापि मैत्र्यां सेवा कार्या स्वामिनः सेवकेन॥

अन्वयः- क्षिप्रे मैत्रे वित्सितार्केज्यवारे सौम्ये लग्ने अर्के कुजे वा खलाभे योनेः मैत्र्यां राशिपश्चापि मैत्र्यां सेवकेन स्वामिनः सेवाकार्या (आरम्भः कर्तुं शक्यः)।

अन्वयार्थः- क्षिप्रे = क्षिप्रसंज्ञकनक्षत्रेषु, मैत्रे = मित्रसंज्ञकनक्षत्रेषु, वित्सितार्केज्यवारे = बुधशुक्ररविगुरुवासरेषु अन्यतमे, सौम्ये लग्ने = शुभे जन्मलग्ने, अर्के = रवौ, कुजे = मङ्गले, वा खलाभे = दशमे एकादशे वा, योनेः मैत्र्यां = नक्षत्राणां योनेः = प्रागुक्तप्राणिनां मैत्र्यां मिथः स्नेहत्वे सति, राशिपश्चापि मैत्र्यां सेवकेन, स्वामिनः सेवा कार्यं

भावार्थः - क्षिप्रे, मैत्रे, वित्सितार्केज्यवारे, सौम्ये लग्ने, अर्के कुजे वा खलाभे योनेः मैत्र्यां राशिपश्चापि मैत्र्यां सेवकेन स्वामिनः सेवाकार्या आरम्भः कर्तुं योग्येति भावः।

७.३.१ कश्यपादीनां मतानि

शुभलग्ने दशमे एकादशे भावे सूर्ये कुजे वा स्थिते विद्या-आयुधादि-अभ्यासयुक्तसेवाकार्यं सिद्ध्यति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"दशमैकादशे सूर्ये कुजे वा शुभलग्नगे।
विद्यायुधाभ्यासयुक्तसेवाकर्मापि सिद्ध्यति॥"

अन्वयः - शुभलग्नगे दशमैकादशे सूर्ये कुजे वा विद्यायुधाभ्यासयुक्तसेवाकर्मापि सिद्ध्यति।

अन्वयार्थः-शुभलग्नगेऽलग्ने शुभे दशमैकादशेऽमुहूर्तलग्नात् दशम-एकादशभावे। सूर्ये = रवौ स्थिते = कुजे वा = मङ्गलस्थिते वा। विद्यायुधाभ्यासयुक्तसेवाकर्मापि = विद्यारम्भादयः। समराभ्यासादयः सेवाकार्याणि सिद्ध्यति = सफलतामाप्नोति।

७.४ द्रव्यप्रयोगऋणग्रहणमुहूर्तविचारः

कस्यचिदपि नवीनवस्तुनः द्रव्यस्य प्रथमप्रयोगः उपयोगो वा कदा करणीयः येन तद् द्रव्यम् अधिककालं यावत् स्थास्येत् इत्येतदर्थं शुभकालस्य ज्ञानाय मौहूर्तिकैः मुहूर्त्तः व्यपदिष्टः।

द्रव्यप्रयोगार्थं शुभनक्षत्राणि = स्वाती, आदित्यः, मृदुनक्षत्राणि, द्विदैवः गुरुः, श्रवणात् त्रीणि नक्षत्राणि, चरे लग्ने, त्रिकोणस्थानेषु अर्थात् नवम-पञ्चमभावयोरन्यतरे भावे अपि शुद्धौ द्रव्यप्रयोगः शुभः। अदित्यनक्षत्रं पुनर्वसुः भवति यतः अदितिः अस्य देवता भवति। "मृगान्त्यचित्रमित्रर्क्षं मृदुः" इति वाक्यानुसारं मृगशिरः, अन्त्यनक्षत्रं रेवती, चित्रा, मित्रनक्षत्रम् अनुराधा इति एतानि नक्षत्राणि मृदुसंज्ञकानि भवन्ति। गुरुनक्षत्रं पुष्यः भवति। "कर्णत्रयः" अर्थात् श्रवणात् त्रीणि नक्षत्राणि चिन्तनीयानि। श्रवण-धनिष्ठा-शतभिषज् इति त्रीणि नक्षत्राणि द्रव्यप्रयोगे योग्यानि भवन्ति।

लग्नशुद्धिः = चरे लग्ने अर्थात् मेषतुलामकरेषु अन्यतमे लग्ने द्रव्यप्रयोगः शुभम् वर्तते। धर्मभावः अर्थात् नवमभावः, सुतभावः अर्थात् पञ्चमभावः, अष्टमभावः एतेषां शुद्धिः द्रव्यप्रयोगाय अनिवार्यः भवति। एतादृशसुमुहूर्ते द्रव्यप्रयोगेन उन्नतिः जायते। अत्र स्मरणीयः अंशः-

अश्विनी, पुनर्वसुः, पुष्यः, चित्रा, स्वाती, विशाखा, अनुराधा, मृगशिरा, श्रवणः, धनिष्ठा, शतभिषा, रेवती इति एतेषु द्वादशनक्षत्रेषु अन्यतमे दिने, चरलग्नेषु, मुहूर्तलग्नात् नवम-अष्टम-पञ्चमभावेषु भावशुद्धौ द्रव्यप्रयोगः शुभदः भवति।

ऋणग्रहणाय योग्यवासरः = आर शब्दस्यार्थः कुजेति। न आरे अर्थात् कुजवासरे ऋणं न ग्राह्यम्। तद्दिवसे ऋणच्छेदः कर्तुं शक्यते। सङ्क्रान्तिदिने वृद्धियोगे ऋणं न ग्राह्यम्। यदि ऋणं गृह्णीयात् तर्हि पुत्रपौत्रादिभिरपि परिहर्तुम् अशक्यम् इति। कुज-सङ्क्रान्त्यादिदिनेषु अवश्यं ऋणं न देयम्। कुजवासरे। हस्तनक्षत्रे। रविवासरे। सङ्क्रान्तौ। वृद्धियोगे वा यदृणं क्रियते तर्हि तत् ऋणं वर्द्धति। बुधवासरे ऋणं न देयम्। बुधवासरे धनसञ्चयः करणीयः।

अत्र भवता स्मर्तव्याः तथ्याः-

- कुजवासरे रविवासरे सङ्क्रमदिने वृद्धियोगे हस्तनक्षत्रे ऋणं न स्वीकरणीयम्।
- बुधवासरे ऋणं न देयम्। बुधवासरे ऋणसङ्ग्रहणं करणीयम्।

तदुक्तं यथा-

"स्वात्यादित्यमृदुद्विदैवगुरुभे कर्णत्रयाश्वे चरे।
लग्ने धर्मसुताष्टशुद्धिसहिते द्रव्यप्रयोगे शुभः॥

नारे ग्राह्यमृणं तु सङ्क्रमदिने वृद्धौ करेऽर्केऽह्नि यत्।
तत् वंशेषु भवेदृणं न च बुधे देयं कदाचित् धनम्॥"

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः-स्वात्यादित्यमृदुद्विदैवगुरुभे कर्णात्रयाश्वे चरे लग्ने धर्मसुताष्टशुद्धिसहिते द्रव्यप्रयोगे शुभः, न आरे, सङ्क्रमदिने, वृद्धौ, करे अर्के अह्नि यत् ऋणं ग्राह्यं तत् वंशेषु ऋणं भवेत्। धनं कदाचित् बुधे न देयं च।

अन्वयार्थः - स्वाती = स्वातिनक्षत्रे, आदित्य = अदितिनक्षत्रे, मृदु = मृदुसंज्ञकनक्षत्रेषु, भे = नक्षत्रे, कर्णत्रय = श्रवणनक्षत्रात् त्रिषुनक्षत्रेषु, अश्वे = अश्विनीनक्षत्रे, चरे = लग्ने, धर्म = लग्नात् नवमभावे, सुताष्ट = पञ्चम-अष्टमभावौ, शुद्धिसहिते = अशुभग्रहैः रिक्ते सति, द्रव्यप्रयोगे = द्रव्यप्रयोगः, शुभः = सन्मङ्गलं भवति। न आरे = कुजवासरे न भवेत् इति अर्थः (आरो वक्रः क्रूरदृक् चावनेयः एते कुजस्य पर्यायपदानि भवन्ति।), सङ्क्रमदिने = सूर्यसङ्क्रमणदिने, वृद्धौ = वृद्धियोगे, करे = हस्ते नक्षत्रे, अर्के = सूर्यवासरे, अह्नि=दिवसे, यत् ऋणं = स्वीकृतं ऋणम्, ग्राह्यं = स्वीकरणीयम्। तत् = ऋणकृतवंशेषु। ऋणं = बहुवर्षं यावत् ऋणं भवेत्। धनं = वित्तं सम्पत् वा। बुधे = बुधवासरे। न देयं = न वित्तम्। अन्यस्मै देयम् = परस्मै यच्छेत्।

भावः - कर्णात्रयाश्वे स्वात्यादित्यमृदुद्विदैवगुरु एतेषु अनयतमेषु नक्षत्रेषु द्रव्यप्रयोगः शुभदः। चरे लग्ने धर्मसुताष्टशुद्धिसहिते द्रव्यप्रयोगे शुभः। वासरशुद्धिः उक्तम् यत् कुज-रविवासरयोः न द्रव्यप्रयोगः करणीयः। सङ्क्रमदिने। वृद्धौ। हस्तनक्षत्रे सूर्यवासरे अह्नि यत् ऋणं ग्राह्यं तत् वंशेषु ऋणं भवेत्। ऋणरूपेण धनं कदाचित् बुधवासरे न च।

७.४.१ विविधग्रन्थानां मतानि

भीमपराक्रमस्य मतम्

मृदुनक्षत्रेषु अश्विनीनक्षत्रे श्रवणादित्रिषु नक्षत्रेषु पुनर्वसौ नक्षत्रे धनव्यवहारः उत्तमः भवति। तदुक्तं - भीमपराक्रमेण यथा-

"मृदुपुष्याश्विनी चैव विशाखाश्रवणत्रयम्।
पुनर्वसौ च शंसन्ति धनादि निधिवर्त्तनम्॥"

अन्वयः - मृदुपुष्याश्विनी चैव विशाखाश्रवणत्रयं पुनर्वसौ च धनादिनिधिवर्त्तनं शंसन्ति।

अन्वयार्थः - मृदु = मृदुसंज्ञकनक्षत्रेषु। पुष्य = पुष्यनक्षत्रेषु। अश्विनी = अश्विनी। विशाखा = विशाखा। श्रवणत्रयं = श्रवण। धनिष्ठा शतभिषज् पुनर्वसौ = पुनर्वसु, चैव च धनादिनिधिवर्त्तनं = सम्पत् निधिः तस्य धनस्य निधेः परिवर्तनं दानं स्वीकारो वा। शंसन्ति = शुभं भवन्ति।

रत्नमालानुसारेण-

चरलग्नात् नवम-पञ्चम-द्वितीय भावेषु शुद्धे चरे द्रव्यस्य व्यवहारः प्रशस्तः। तच्च-

शुद्धेषु धर्मात्मजनैः धनेषु चरे विलग्ने द्रविणप्रयोगः॥

ज्योतिःप्रकाशे-

कुजवासरे ऋणं न गृह्णीयात् बुधवासरे न देयम्। ऋणच्छेदः कुजवासरे कुर्यात्। धनसञ्चयं बुधवासरे कुर्यात् तदुक्तं यथा-

ऋणं भौमे न गृह्णीयान्न देयं बुधवासरे।
ऋणच्छेदं कुजे कुर्यात् सञ्चयं सोमनन्दने।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

७.५ हलप्रवहणमुहूर्तविचारः

''अन्नम् हि धान्यसञ्जातं धान्यं कृष्या विना न च।
तस्मात् सर्वं परित्यज्य कृषिं यत्नेन कारयेत्॥''

कृष्या धान्यं, धान्यात् अन्नं सञ्जायते। ''कृषितो नास्ति दुर्भिक्षम्'' इति उक्तिः श्रुतपूर्वा स्यात्। अतः सर्वकार्यं परित्यज्य (आलस्यादिकं त्यक्त्वा परिश्रमेण) कृषिकर्म करणीयम् इति कृषिपराशरे उट्टङ्कितम् अस्ति। कृषिविधाने कृषिकः वृषाभ्यां कृषिक्षेत्रे हलेन प्रवहणं करोति। बलवद्भ्यां वृषाभ्यां कर्षितं कृषिक्षेत्रं कृषिकर्मणि सफलतां प्रयच्छति। निर्बलैः वृषैः कृतं कर्म निष्फलम् एव स्यात्। यतः बलवत्तरेण वृषेण हलप्रवहणं पृथिव्यां मृत्तिकां उत्कृष्टतया मृदुं करोति। तेन साफल्येन समाजस्य आहारादिपोषणं भवति। अतः हलप्रवहणे सफलता प्राप्तये कृषिकर्मस्यारम्भे हलप्रवहणमुहूर्तविचार उक्त। तद्यथा-

हलप्रवहणयोग्यशुभतिथयः-रिक्तासंज्ञकतिथिषु षष्ट्यां, एषु तिथिषु कृषिकर्म क्षयकरं भवति। रिक्ता तिथयः चतुर्थीनवमीचतुर्दश्यः तिथयः भवन्ति। अष्टमी-षष्ठीतिथी अपि वर्ज्ये इति मुहूर्तग्रन्थेषु वर्तन्ते।

हलप्रवहणयोग्यशुभनक्षत्राणि - मूल-विशाखा-मघा-चरसंज्ञकनक्षत्राणि (स्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषज्) - मृदुसंज्ञकनक्षत्राणि, ध्रुवनक्षत्राणि (उत्तरात्रय रोहिण्यः), क्षिप्रसंज्ञकनक्षत्राणि (हस्ताश्विपुष्याः) एषु अन्यतमे नक्षत्रे हलप्रवहणकार्यं शुभदं भवति।

हलप्रवहणयोग्यशुभवासराः - रवि-शनिवासरौ उभयं त्यक्त्वा अन्येषु वासरेषु शुभं हलप्रवहणकार्यारम्भः कर्तुं शक्यते।

लग्नशुद्धिः-पापग्रहाः बलहीनाः भवेयुः तथा लग्नभावे गुरुः चन्द्रश्च भवेताम्। चन्द्रः जलराशौ भवेत् । एवं विधे लग्ने हलप्रवहणकर्मारम्भे कृषकः सफलतां प्राप्नोति।

लग्नराशिशुद्धिं विशेषेण च कथितं वर्तते। मेषः, कर्कः, सिंहः, तुला, मकरः, कुंभः एषु लग्नेषु कृषिकर्म न प्रशस्तम्।

अस्मिन् विचारे अवधेयाः अंशाः-

मेषः कर्कः सिंहः तुला मकरः कुंभः इत्येतानि लग्नानि इत्येतानि लग्नानि विहाय लग्नभावः गतयोः गुरुचन्द्रयोः, पापग्रहाणां बलहीनातायां, रविशनिवासरौ विहाय, रिक्तासंज्ञकतिथिषु षष्ट्यां, चरमृदुध्रुवक्षिप्रनक्षत्रेषु शुभदः भवति।

''मूलद्वीशमघाचरध्रुवमृदुक्षिप्रैर्विनार्कं शनि।
पापैर्हीनबलैर्विधौ जललवे शुक्रे विधौ मांसले॥

लग्ने देवगुरौ हलप्रवहणं शस्तम् न सिंहे घटे।
कर्काजैणघटे तनौ क्षयकरं रिक्तासु षष्ठ्यां तथा॥''

अन्वयः - मूलद्वीशमघाचरध्रुवमृदुक्षिप्रैः च एकोनवंशतिनक्षत्रैः हलप्रवहणं हलप्रवृत्तिं कुर्यात्। पापैः हीनबलैः जललवे शुक्रे विधौ मांसले देवगुरौ लग्नस्थे हलप्रवहणं शुभम्। सिंहे घटे कर्क-अज-एण-घटे तनौ कृषिकर्म न शस्तम् तथा रिक्तासु षष्ठ्यां न शस्तम्।

अन्वयार्थः - मूलम् (निर्ऋतिनक्षत्रम्) द्वीश=विशाखा। मघा=पितृ। चर=(स्वाती-आदित्य-श्रवण-धनिष्ठाः)। ध्रुव=(उत्तरात्रयरोहिण्यः)। मृदु=(मृगान्त्यचित्रमित्रर्क्षं)। क्षिप्रैः=(हस्ताश्विपुष्याभिजितः) च एकोनविंशतिनक्षत्रैः। हलप्रवहणं=हलप्रवृत्तिं कुर्यात्। पापैः हीनबलैः=पापग्रहाः निर्बलत्वे। जललवे=जलराशौ=जलचरराशेः यथा मकरस्य नवांशे वा। शुक्रे=शुक्रग्रहे। विधौ=चन्द्रे। मांसले=बलवते। देवगुरौ=बृहस्पतिः। लग्नस्थे=मूर्तौ। हलप्रवहणं

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुभम्। सिंहे=सिंहराशौ। घटे=कुंभराशौ। कर्क=कर्काटकराशौ। अज=मेषराशौ। एणे=मकरे। घटे=तुलायां एषु अन्यतमे लग्ने कृषिकर्म न शस्तम् तथा रिक्तासु=चतुर्थी-नवमी-चतुर्दशीसु। षष्ठ्यां=षष्ठीतिथौ (न शस्तम् नशुभम्)।

भावः- मूलद्वीशमघाचरध्रुवमृदुक्षिप्रैः च एकोनवंशतिनक्षत्रैः हलप्रवहणं हलप्रवृत्तिं कुर्यात्। पापैः हीनबलैः, जलचरराशेः नवांशे गते शुक्रे चन्द्रे बले देवगुरौ लग्नस्थे हलप्रवहणं शुभम्। सिंह-मेष-कर्क-तुला-मकरेषु अन्यतमे लग्ने अर्थात् चरलग्ने कृषिकर्म न शस्तम् तथा रिक्तासु षष्ठ्यां न शस्तम्।

७.५.१ नारदादि-आचार्याणां मतानि

भारतीयज्योतिषशास्त्रस्य इतिहासे ब्रह्मा नारदाय उपदेशं कृतवान् इति श्रूयते। अत्र नारदस्य मतम् एवं वर्तते। मृदुध्रुवक्षिप्रचरसंज्ञकनक्षत्रेषु विशाखापितृभेषु मूलभे च वृषः हलप्रवहणं प्रथमं विद्यात्। तदुक्तं यथा-

मृदुध्रुवक्षिप्रचरविशाखापितृभेषु च।
हलप्रवाहं प्रथमं विद्यान्मूलभे वृषः॥

अथञ्च श्रीपतिः इत्थम् अभिप्रैति-

मृदुध्रुवक्षिप्रचरसंज्ञकनक्षत्रेषु मघाविशाखासहितेषु स्वस्थैः वृषैः प्रथमं हलप्रवाहं विदध्यात्। तेन साफल्यं भवति इति। तदुक्तं यथा मृदुध्रुवक्षिप्रचरेषु मूले मघाविशाखासहितेषु भेषु नीरोगाः मुष्काः अन्विताः सौरभेयैः प्रथमं हलप्रवाहं विदध्यात्। यथा-

मृदुध्रुवक्षिप्रचरेषु मूले मघाविशाखासहितेषु भेषु।
हलप्रवाहं प्रथमं विदध्यात् नीरोगमुष्कान्वितसौरभेयैः॥

तच्च व्यवहारतत्त्वे एवं वर्तते-

पूर्वाद्वीशयमाग्निभेऽर्केयमयो रिक्तासु नेष्टा कृषिः॥

लग्नशुद्धिनिमित्तं रत्नमालायाम् उच्यते यत् यदि शुक्रः चन्द्रः च बलवत्तरौ भवेतां शनिकुजरवयः दुर्बलाः स्युः, लग्नगतः चन्द्रः जलचरराशौ भवेत्, गुरुः लग्नगतश्च भवेत्। तदा कृषिक्रियायां लग्नशुद्धिर्भवति। स एव सुयोग्यसमयः कथितः। तच्च-

शालिनि सितेऽथ शीतगौ दुर्बलैः असितभौमभास्करैः।
आश्रिते शशिनि वारिजोदये लग्नवर्तिनि गुरौ कृषिक्रिया॥

अत्र काश्यपः अपि तथैव निगदति यत्- गुरुः लग्नगतः यदि शुक्रः चन्द्रश्च बलिनः स्युः। चन्द्रः लग्ने स्यात् क्रूरग्रहाः निर्बलाः स्युः तदा कृषिक्रियायै प्रशस्तसमयः भवति।तदुक्तं यथा-

"गुरौ लग्नगते शुक्रे बलिन्यापोदये विधौ।
शस्ता कृषिक्रिया तत्र दुर्बलैः क्रूरखेचरैः।"

ज्योतिःसारसागरे- ज्योतिःसारसागरे लग्नवशात् कर्षितस्य फलम् कथितम् अस्ति। तदित्थं- मेषलग्ने पशून् हन्ति। कर्कटे जलजं भयम्। सिंहलग्ने सस्यस्य भयं ज्ञेयं। तुलायां हलसङ्क्षयः। मकरे सस्यनाशः कुम्भे चौरभयं स्यात्। तिथिवशात् अपि फलम् उक्तं वर्तते। तद्यथा - अष्टमी बलीवर्दान् हन्ति। नवमी सस्यघातिनी भवति। षष्ठी कीटजननी भवति। चतुर्दशी पशून् हन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

''मेषलग्ने पशून् हन्ति कर्कटे जलजं भयम्।
सिंहे सस्यभयं ज्ञेयं तुलायां हलसङ्क्षयः ।
मकरे सस्यनाशः स्यात् कुम्भे चौरभयं तथा।
हन्त्यष्टमी बलीवर्दान् नवमी सस्ययातिनी॥

षष्ठी च कीटजननी पशून् हन्ति चतुर्दशी॥''

१. कदा स्वामिनः सेवाकार्यारम्भः कर्तुं योग्यसमयः भविष्यति?

२. योनिकूटः स्वामिसेवकसम्बन्धे कथम् उपयुज्यते?

३. ग्रहमैत्रीकूटः स्वामिसेवकसम्बन्धे कथं चिन्त्यते?

४. द्रव्यप्रयोगं नाम किम्?

५. द्रव्यप्रयोगाय योग्यलग्नानि के भवन्ति?

६. द्रव्यप्रयोगाय योग्यनक्षत्राणि कानि भवन्ति?

७. द्रव्यप्रयोगाय योग्यवासराः के भवन्ति?

७.६ बीजोप्तिमुहूर्त-फणिचक्र-हलचक्राणि।

भारतीयानाम् आन्तर्यभावः ''माता भूमिः पुत्रोऽहं पृथिव्याः'' इति अस्ति। पृथिवीं मातृभावानया सम्पूजयन्ति। तादृश्याः पृथिव्याः हलेन कुदलेन कृषकाः कर्षणं कुर्वन्ति। अपि च प्राचीनकाले ज्योतिषशास्त्रेण एव समीचीनसमयनिर्धारणं कुर्वन्ति स्म। अतः कृषिकार्ये बीजोप्तिमुहूर्तविचारः वर्तते। अतः कृषियोग्यबीजोप्तिमुहूर्तं वक्ष्ये। श्रवणः शतभिषज् पुनर्वसुः विशाखा इत्येषु नक्षत्रेषु मूलमघाध्रुवामृदुक्षिप्रधनिष्ठास्वातीषु बीजवपनं शुभं भवति। अत्र ध्यातव्यः अंशः-

श्रवणः शतभिषज् पुनर्वसुः विशाखा इत्येषु नक्षत्रेषु मूल-मघा-ध्रुव (उत्तरात्रयरेहिण्यः)-मृदु (मृगान्त्यचित्रमित्रर्क्षम्) क्षिप्र (हस्ताश्विपुष्याभिजितः) धनिष्ठास्वातीषु- बीजवपनं शुभम् भवति।

बीजोप्तौ फणिचक्रम् -

अगुभतो अष्ट-अग्नि-इन्दु-राम-इन्दवः। राम-इन्दु-अग्नि-युगाः अन्या सत् शुभकराणि भवन्ति। गावः नाम किरणाः भवन्ति। यस्य किरणाभावः सः इति अर्थे अगुः राहुः इति। यस्य स्वरूपाभावः तस्य कुत किरणाः तादृशः किरणरहितः नाम राहुः भवति। सः अगुः यस्मिन् नक्षत्रे स्थितः तत् अगुभं भवति। अगुभतः अर्थात् राहुः यस्मिन् नक्षत्रे स्थितः वर्तते तस्मात् नक्षत्रात् आरभ्य अष्टौ नक्षत्राणि अशुभदानि। अष्टौ नक्षत्रात् पुनः अग्निसंख्यात्मकानि त्रीणि यतः आहवनीयः (आवसक्तः दाक्षिणाग्निरिति) त्रीणि नक्षत्राणि शुभदानि। तानि राहुस्थितनक्षत्रात् नवम-दशम-एकादशतमनक्षत्राणि भवन्ति। ततः इन्दुसंज्ञात्मकसंख्यातुल्यम् (अर्थात् इन्दुः चन्द्रः एकः एव इत्यस्मात् कारणात् इन्दुशब्देन एकम् इति अभिधीयते) एकं नक्षत्रम् अशुभम् अर्थात् राहुस्थितनक्षत्रात् द्वादशतमनक्षत्रं भवति। रामशब्देन त्रि-संख्या ज्ञेया भवति। (यतः बलरामः परशुरामः रामेति त्रयः रामाः भवन्ति)। ततः (रामः) त्रीणि शुभानि। अर्थात् त्रयोदशतमं, चतुर्दशतमं, पञ्चदशतमम् इति प्रागुक्तत्रीणि नक्षत्राणि भवन्ति। ततः (इन्दुसंज्ञायां) एकम् अशुभम्। अर्थात् षोडशतमं नक्षत्रं भवति। ततः पुनः (रामः) त्रीणि नक्षत्राणि सप्तदशतमम् अष्टादशतमं नवदशतमनक्षत्रं शुभानि भवन्ति। ततः इन्दुरर्थात् एकं विंशतितमं नक्षत्रं अशुभम्। ततः (अग्निसंख्यातुल्यानि) त्रीणि नक्षत्राणि एकविंशतितमं द्वाविंशतितमं त्रयेविंशतितमं नक्षत्राणि शुभानि भवन्ति। युगसंज्ञायां उल्लिखिते। चत्वारि युगानि ज्ञेयानि। तानि च (कृत-त्रेता-द्वापर-कलि

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति चत्वारि युगानि) ततः चत्वारि नक्षत्राणि अशुभानि। तानि चतुर्विंशादारभ्य सप्तविंशतितमं यावत् यानि नक्षत्राणि भवन्ति। एवं बीजोप्तौ सप्तविंशतिनक्षत्राणां शुभाशुभत्वम्।

"एतेषु श्रुतिवारुणादितिविशाखोडूनि भौमं विना।
बीजोप्तिर्गदिता शुभा त्वगुभतोऽष्टाग्नीन्दुरामेन्दवः।
रामेन्द्वग्नियुगान्यसच्छुभकराण्युप्तौ हलेऽर्कोज्झिताद्
भाद्रामाष्टनवाष्टभानि मुनिभिः प्रोक्तान्यसत्सन्ति च॥"

अन्वयः - श्रुतिः वारुण अदिति विशाखा उडूनि भौमं विना एतेषु बीजोप्तिः शुभा गदिता। अगुभतो अष्ट-अग्नि-इन्दु-राम-इन्दवः राम-इन्दु-अग्नि-युगा अन्या सत् शुभकराणि युप्तौ हले अर्कोज्झिताद् भात् राम-अष्ट-नवाष्टभानि मुनिभिः प्रोक्तानि असत्सन्ति च।

अन्वयार्थः-श्रुतिः=श्रवणः। वारुणं=शतभिषज्। अदितिः=पुनर्वसुः। विशाखा=विशाखा। एतैः उडूनि=नक्षत्राणि। भौमं=कुजवासरं विना। बीजोप्तिः शुभा गदिता। अगुभतो अष्टौ=८। अग्निः=३ (आहवनीय, गार्हस्पत्य दाक्षिणाग्निरिति त्रीणि)। इन्दुः=(कुमुदबान्धवः चन्द्रः इति शब्दार्थः चन्द्रसंख्यावशात् "एकम्" ग्राह्यम्)१। रामः=३। इन्दवः=१। रामः=३। इन्दुः=१। अग्निः=३। युगाः=४। असत् अशुभकराणि उप्तौ। हले=हलचक्रलेखने। अर्कोज्झिताद्=सूर्योज्झिताद्। सूर्यस्थं त्यक्त्वा तस्मात्। भात्=नक्षत्रात्। रामः=त्रीणि नक्षत्राणि। असत् सन्ति=अशुभफलानि। अष्ट=प्रागुक्तनक्षत्रात् अष्टौ नक्षत्राणि। नव=पूर्वोक्तानि नवनक्षत्राणि। अष्टभानि=पुनः प्रागुक्तनक्षत्रात् अष्टौ नक्षत्राणि। मुनिभिः प्रोक्तानि=ऋषिभिः गदितानि।

भावः- वासरेषु भौमावासरं त्यक्त्वा तथा नक्षत्रेषु श्रवण-शतभिषा-पुनर्वसु-विशाखानक्षत्राणि त्यक्त्वा अन्येषु नक्षत्रेषु वारेषु च बीजोप्तिः शुभा गदिता। बीजवपनाय फणिचक्रम् आश्रयणीयम्। तदनुसारेण राहुगतनक्षत्रात् आरभ्य एकान्तरक्रमेण अष्ट-अग्नि-इन्दु-राम-इन्दवः राम-इन्दु-अग्नि-युगानि असत्-शुभकराणि अर्थात् राहुगतनक्षत्रात् अष्टौ नक्षत्राणि अशुभानि, ततः त्रीणि शुभानि तस्मात् एकम् अशुभं ततः त्रीणि शुभानि तदनु एकम् अशुभं तस्मात् त्रीणि शुभानि ततः एकम् असत् तदनु त्रीणि सत् ततः चत्वारि अशुभनक्षत्राणि भवन्ति। हले चक्रे सूर्यस्थनक्षत्रात् राम-अष्ट-नवाष्टभानि अशुभफलप्रदानि भवन्ति।

७.६.१ रत्नमालादिग्रन्थानां मतानि

हस्त-अश्विनी-पुष्य-उत्तरा-रोहिणी-चित्रा-अनुराधा-मृगशिरा-रेवती-स्वाती-धनिष्ठा मघा- मूला नक्षत्रेषु बीजवपनक्रिया उत्कृष्टफलप्रदा भवति। तच्च रत्नमालायाम् उक्तम् यथा-

"हस्ताश्विपुष्योत्तररोहिणीषु चित्रानुराधामृगरेवतीषु।
स्वातौ धनिष्ठासु मघासु मूले बीजोप्तिरुत्कृष्टफलप्रदा प्रदिष्टा॥"

वसिष्ठमहर्षिणा अपि-धातृद्वये अर्थात् रोहिणी मृगशिरा कौणप पितृनक्षत्रं मघा पुष्ये हस्तत्रये अर्थात् हस्ता चित्रा स्वाती मूलम् एतेष्वन्यतमे नक्षत्रे बीजवपनं शुभं भवति।

"धातृद्वये कौणपपितृवायुवसूडुषु।
समूलभेषु बीजोप्तिरत्युत्कृष्टफलप्रदा॥"

नारदेन उक्तं भावः मृदुध्रुवक्षिप्रसंज्ञकनक्षत्रेषु पितृ-वायु-वसु उडुषु समूलभेषु बीजोप्तिः उत्कृष्टफलप्रदा भवति। तच्च-

"मृदुध्रुवक्षिप्रभेषु पितृवायुवसूडुषु।
समूलेभेषु बीजोप्तिरत्युकृष्टफलप्रदा॥"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

काश्यपेनापि उक्तं यत् वसु-वायुज-नैर्ऋति-क्षिप्रध्रुवमृदु-उडुषु सीतां स्मृत्वा अथ बीजवपनं उत्कृष्टफलप्रदा।। अत्र मघानक्षत्रं न उक्ता। तच्च-

''वासुवायुजनैर्ऋत्य क्षिप्रध्रुवमृदुडूषु।
सीतां स्मृत्वाथ बीजोप्तिरत्युत्कृष्टफलफप्रदा।।''

व्यवहारतत्त्वे उक्तं यत् कुजवासरे बीजोत्पत्तिः निषिद्धः। अर्थात् अन्यवासरेषु शुभदः। तदित्थम्-

''एषु एन्द्रश्रुतिवारुणेषु च कुजे बीजोप्तिः।।''

किमर्थं कृषिः कुजवासरे न करणीया इति राजमार्तण्डे उट्टङ्कितं वर्तते। रवि वासरे रौद्र अर्थात् आर्दायाः आदिपादतः पृथिव्यां रजः सञ्जायते। पृथिवी अनेन रजसा पीडिता अतः तस्मिन् काले न कृषिः कर्तव्यः। तदुक्तं यथा-

''रवौ रौद्राद्यपादस्थे भूमेः सञ्जायते रजः।
तस्माद् दिनत्रयं तत्तु बीजवापे परित्यजेत्।।''

७.६.२ बीजाप्तौ फणिचक्रविमर्शः

बीजवपने फणिचक्रस्य महत्वं वर्तते। फणिः नाम सर्पः यस्य कारकः ''राहुः'' इति ज्ञेयः। राहुः यस्मिन् नक्षत्रे अभीष्टकाले स्थितः वर्तते तत्नक्षत्रात् आरभ्य अष्टौ नक्षत्राणि अशुभदानि। तस्मात् पुनः त्रीणि नक्षत्राणि शुभदानि। तानि राहुस्थितनक्षत्रात् नवमं दशमम् एकादशतम् इति त्रीणि नक्षत्राणि भवन्ति। एकादशतः परं एकम् अशुभम् अर्थात् राहुस्थितनक्षत्रात् द्वादशतमनक्षत्रं अशुभप्रदं भवति। ततः त्रीणि नक्षत्राणि अर्थात् त्रयोदशतमं चतुर्दशतमं पञ्चदशतमं नक्षत्राणि शुभानि भवन्ति। ततः परम् अग्रिमम् एकं नक्षत्रम् अर्थात् षोडशतमं नक्षत्रं अशुभं भवति। ततः त्रीणि नक्षत्राणि सप्तदशतम-अष्टादशतम-नवदशतमनक्षत्राणि शुभानि भवन्ति। ततः एकं नक्षत्रम् विंशतितमम् अशुभम्। ततः त्रीणि नक्षत्राणि अर्थात् एकविंशतितमं विंशतितमं द्वाविंशतितमं त्रयेविंशतितमम् इति नक्षत्राणि शुभानि भवन्ति। ततः चत्वारि चतुर्विंशतितमं पञ्चविंशतितमं षड्विंशतितमं सप्तवंशतितमम् इति नक्षत्राणि अशुभानि भवन्ति। एवं बीजाप्तौ सप्तविंशतिनक्षत्राणां शुभाशुभत्वम्।

फणिचक्रम्

०-२७	8	3	1	3	1	3	1	3	4
नक्षत्राणि	0-8	(9,10,11)	(12)	(13,14,15)	(16)	(17,18,19)	(20)	(21,22,23)	(24,25,26,27
फलम्	अशुभम्	शुभम्	अशुभम्	शुभम्	अशुभम्	शुभम्	अशुभम्	शुभम्	अशुभम्

उक्तञ्च नारदेन -

''भवेद् भत्रितयं मूर्ध्नि धान्यनाशाय राहुभात्।
गले त्रयं कञ्जलाय वृद्धयै द्वादश चोदरे।।

निस्तण्डुलत्वं लाङ्गूले भचतुष्टयम् ईरितम्।
नाशो बहिः पञ्चके स्याद् बीजोप्ताविति चिन्तयेत्।।''

राहुः यस्मिन् नक्षत्रे स्थितः तस्मात् नक्षत्रात् त्रीणि नक्षत्राणि राहुचक्रस्य शिरसि स्थाप्यानि। एतानि त्रीणि नक्षत्राणि धान्यनाशकराणि भवन्ति। ततः त्रीणि नक्षत्राणि गले लिखेत्। एतानि त्रीणि नक्षत्राणि श्यामिकासम्पादनाय भवति। ततः द्वादशभानि राहुणा उदरे स्थापनीयानि। एषु नक्षत्रेषु धान्यवृद्धयः भवन्ति। ततः नक्षत्रचतुष्टयं राहुणा पुच्छे स्थापनीयम्। अत्र स्थितेषु

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नक्षत्रेषु तुण्डलराहित्यं (धान्यराहित्यम्) भवति। ततः अवशिष्टं नक्षत्रपञ्चकं धान्यनाशकराणि भवन्ति।

फणिचक्रम्

27	3	3	12	4	5
नक्षत्राणि					
स्थानम्	शिरसि	गले	उदरे	पुच्छे	5
फलम्	धान्यनाशकरम्	श्यामिकासम्पादनम्	धान्यवृद्धिः	निस्तण्डुलत्वम्	धान्यनाशकरम्

अत्र रत्नमालायामुक्तमिदम्-

''मूर्ध्नि त्रीणि गले त्रयं च जठरे धिष्ण्यानि च द्वादश।
स्यात्पुच्छे च चतुष्टयं बहिरतो भानां स्थितं पञ्चकम्।
क्ष्वेडं कञ्जलमन्नवृद्धिरधिका निस्तण्डुलत्वं क्रमात्
स्यादीति प्रभवं भयं च फणिभाद् बीजोप्तिकाले स्फुटम् ॥'' इति

केचिदाचार्याः सूर्यनक्षत्रात् इति अर्थं स्वीकुर्वन्ति। स्वरोदयवाक्यैः उक्तं ''सूर्यभात् उरगः स्थाप्यः'' अनेन वाक्येन मतभेदः दृश्यते। नारदवाक्येषु साक्षात् राहुस्थितनक्षत्रात् इति उक्तं वर्तते। कश्यपमुनिमतानुसारेण राहुस्थितनक्षत्रात् अष्टौ नक्षत्राणि यावत् अशुभानि भवन्ति। तदुक्तं यथा-''राहुधिष्ण्यात् समारभ्य धिष्ण्येष्वष्टसु निष्फलम्।''

सूर्यभुक्तनक्षत्रात्

28	3	8	9	8
नक्षत्राणि				
फलम्	अशुभम्	शुभम्	अशुभम्	शुभम्

लग्नशुद्धिः-

''भवरिपुसहजे पापैस्त्रिकोणकेन्द्रस्थितैश्च शुभैः।
कथितेषु च धिष्ण्येष्वपि शुभलग्ने बीजवापनं कार्यम्॥''

भवरिपुसहजे पापैः त्रिकोणकेन्द्रस्थितैः च शुभैः कथितेषु च शुभलग्ने धिष्ण्येष्वपि बीजवपनं कार्यम्।

७.६.३ हलाकृतिविमर्शः

हलचक्रे सूर्यभुक्तनक्षत्रात् त्रीणि नक्षत्राणि अशुभानि। ततः अष्टौ नक्षत्राणि शुभानि। ततः नवनक्षत्राणि अशुभफलदानि भवन्ति। ततः अष्टौ नक्षत्राणि शुभानि भवन्ति। तदुक्तं वसिष्टमहर्षिणा-

''अर्कगतागतसंस्थं भत्रितयं नेष्टमुभयतस्त्विष्टम्।
षोडशधिष्ण्यम् नवकं शिष्टमनिष्टं लाङ्गले चक्रे॥''

इति अर्केण भुक्तनक्षत्रात् त्रीणि नक्षत्राणि भोग्यनक्षत्राणि नेष्टानि।ततः षोडशनक्षत्राणि उभयतः शुभम्। अर्थात् सूर्यभुक्तानि अष्टौ नक्षत्राणि एवं सूर्यभोग्यानि अष्टौ नक्षत्राणि शुभानि। शिष्टानि नवनक्षत्राणि अशुभम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हलचक्रम् रविवशात्

सूर्यभुक्तनक्षत्रम्	सूर्यस्थितनक्षत्रात्		
8	3	5	9
शुभम्	अनिष्टम्	शुभम्	अनिष्टम्

नारदस्य वचनम् अनुवर्तते-

''हलादौ वृषनाशाय भत्रयं सूर्यभुक्तभात्।
अग्रे ऋक्षत्रयं लक्ष्म्यै सौख्यं पार्श्वस्थपञ्चके॥
शूलत्रयेऽपि नवकं मरणायान्यपञ्चकम्।
श्रियै पञ्चत्रयं श्रेष्ठं स्याच्चक्रे लाङ्गले शुभे॥''

हलप्रवहणसमये सूर्यभुक्तनक्षत्रात् त्रीणि नक्षत्राणि सौख्यं जनयन्ति। ततः परं त्रीणि नक्षत्राणि सम्पत्कराणि शुभदानि भवन्ति। ततः अग्रिमपञ्चनक्षत्राणि सौख्यदायकानि भवन्ति। ततः अग्रिमनवनक्षत्राणि मृत्युहेतवः भवन्ति। ततः अग्रे अन्य पञ्चनक्षत्राणि श्रियै भवेयुः। तदग्रे त्रीणि नक्षत्राणि श्रेष्ठं फलं यच्छन्ति।

सूर्यभुक्तनक्षत्रात् हलचक्रम्।

सूर्यभुक्तनक्षत्रात्	3	3	5	9	5	3
फलम्	सौख्यानि	सम्पत्करम्	सौख्यम्	मृत्युहेतवः	श्रियम्	शुभम्

बीजवपने राहुचक्रम् -

''त्रिविष्टासु नवर्क्षासु सप्तस्वर्कविमुक्तभात्।
हानिवृद्धिः कर्तृमृत्युर्लक्ष्मीश्चैव यथाक्रमम्॥''

रविणा विमुक्तत्रीणि नक्षत्राणि हानिं जनयन्ति। ततः नवनक्षत्रेषु कर्तृनाशः। ततः सप्तसु नक्षत्रेषु लक्ष्मीप्राप्तिः इति यथाक्रमं फलं ज्ञेयम्।

बीजवपने राहुचक्रम्

रविभुक्तत्रीणि नक्षत्राणि	3 X 3 = 9	7
हानिः	कर्तृनाशः	लक्ष्मीप्राप्तिः

७.७ शिरामोक्षणविरोकादिधर्माक्रियामुहूर्ताः

आयुर्वेदे सूक्ष्मशस्त्राघातेन नाडीतः रक्तमोक्षणक्रिया शिरामोक्षणनाम्नि व्यवह्रियते।

नक्षत्रशुद्धिः- त्वष्ट्राद् नक्षत्रद्वयं चित्रा स्वाती। मित्रनक्षत्राद् नक्षत्रद्वयम् अनुराधा ज्येष्ठा। कृत्तिकानक्षत्रात् नक्षत्रद्वयं रोहिणी मृगशिरानक्षत्रम् जलनक्षत्रं शतभिषज् लघुसंज्ञकानि अश्विनी-पुष्य-हस्त-अभिजित्-श्रवणं एषु नक्षत्रेषु शिरामोक्षणं कर्तुं योग्यम्।

इत्थं चित्रा-स्वाती-अनुराधा-ज्येष्ठा-रोहिणी-मृगशिरनक्षत्रं-शतभिषज्-अश्विनी-पुष्य-हस्त-अभिजित्-श्रवणम् इत्येतानि नक्षत्राणि शिरोमोक्षणाय शुभफलदानि।

वासरशुद्धिः-मङ्गलगुरुरविवासरेषु शिरामोक्षणं कुर्यात्। बुधशनिवासरं हित्वा अन्यवासरेषु वमनादिकं कुर्यात्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धर्मक्रियामुहूर्त्तः-श्रुतौ स्मृतौ च नैकाः धार्मिकक्रिया उक्ताः। ''यागादिरेव धर्मः'' इति जैमिनिना मीमांसासूत्रेषु गदिता। ''स्वर्गकामो यजेत'' इत्यादि उक्त्यनुसारं स्व-इच्छापूर्त्यर्थं यागादयः कुर्वन्ति स्म। तदर्थमपि अस्मिन्नेव श्लोके मुहूर्तम् उक्तम् अस्ति।

धर्मक्रियार्थं योग्यनक्षत्राणि-मित्र-क्षिप्र-चर-ध्रुवेतित्रयोदशनक्षत्रेषु तथा रवि-चन्द्रबुधगुरुशुक्रवासरेषु धर्मक्रियाः शुभदाः भवन्ति। इत्थं मृगशिरस्-रेवती-चित्रा-अनुराधा-हस्त-अश्विनी-पुष्य-अभिजित्-स्वाति-आदित्य-श्रवण-धनिष्ठा-शतभिषज इत्येतेषु नक्षत्रेषु चन्द्रबुधगुरुशुक्रवासरेषु धर्मक्रियार्थं शुभं भवति।

धर्मक्रियार्थं लग्नशुद्धिः- विधोः जीवस्य च लग्ने वा लग्ने च गुरौ सति, कर्तुश्च गुरुबले च सति धर्मक्रिया हिता। विधुः नाम चन्द्रः। चन्द्रस्य लग्ने वा जीवः नाम गुरुः गुरोः लग्ने धर्मक्रियाः कर्तुं शक्याः।

''त्वाष्ट्रान्मित्रकभाद् द्वयेम्बुपलघुश्रोत्रे शिरामोक्षणं।
भौमार्केज्यदिने विरेकवमनाद्यं स्याद् बुधार्कं विना॥
मित्रक्षिप्रचरध्रुवे रविशुभाहे लग्नवर्गे विदो॥
जीवस्यापि तनौ गुरौ निगदिता धर्मक्रिया तद् बले॥''

अन्वयः - त्वाष्ट्राद् मित्राद् कभात् अम्बुपद्वयं लघुनि श्रोत्रम् एषु नक्षत्रेषु तथा कुज-रवि-गुरुदिने शिरोमोक्षणं (कुर्यात्।) बुधार्कौ विना भौमार्केज्यदिने विरेकवमनाद्यं स्याद् मित्रक्षिप्रचरध्रुवे रविशुभाहे विदो जीवस्यापि लग्नवर्गे गुरौ तनौ तद् बले धर्मक्रिया निगदिता।

अन्वयार्थः - त्वाष्ट्राद्=चित्राद्। मित्राद्=अनुराधात्। कः=रोहिणी। अम्बुपः=पूर्वाषाढा। द्वयं=प्रागुक्तनक्षत्रात् द्वयम्। लघूनि =हस्ताश्विपुष्याभिजितः। श्रोत्रं=श्रवणम्। एषु नक्षत्रेषु=एतेषु नक्षत्रेषु। तथा कुजः=मङ्गल। रविः=अर्कः। गुरुदिने=गुरुवासरे। शिरोमोक्षणं (कुर्यात्)। बुधार्कौ=बुध श्च शनिश्च। विना=हित्वा। भौमाकज्यदिने=कुजरविगुरुदिवसेषु। विरेकवमनाद्यं=विरेचनवमनादिकम्। स्याद् = कर्तुं शक्यम्। मित्रक्षिप्रचरध्रुवे=मित्रक्षिप्रचरसंज्ञकनक्षत्रेषु। रविशुभाहे=रविगुरुवासरेषु। लग्नवर्गे=तेषां लग्ने होरादिषड्वर्गे वा। विदोः=बुधस्य। जीवस्यापि=गुरोः अपि। तनौ गुरौ=गुरुः लग्ने इति। तद् बले=गुरुः बली। धर्मक्रिया=यज्ञादिकार्यं। निगदिता=कथिता।

भावार्थः-अश्विनी-रोहिणी-मृगशिरस्-पुष्य-हस्त-चित्रा-स्वाति-अनुराधा-ज्येष्ठा-पूषा-श्रवण-अभिजित्-शतभिषज इत्येतेषु नक्षत्रेषु तथा कुज-रवि-गुरुदिने शिरामोक्षणं (कुर्यात्)। बुधार्कौ विना भौमार्केज्यदिने विरेकवमनाद्यं स्याद्। विदो जीवस्यापि लग्नवर्गे गुरौ तनौ तद् बले धर्मक्रिया निगदिता।

७.७.१ ज्योतिःसागरादिग्रन्थानां मतानि

चित्रानक्षत्रात् नक्षत्रद्वयं चित्रास्वाती। विधिनक्षत्रं नाम रोहिणीनक्षत्रं। तस्मात् नक्षत्रद्वयम्। अर्थात् रोहिणी मृगशिरा च। मित्रनक्षत्रं नाम अनुराधानक्षत्रं। तस्मात् द्वयम् अर्थात् अनुराधाज्येष्ठे। वारुणनक्षत्रं नाम शततारका। लघुः हस्त-अश्विनीपुष्य-अभिजितः। विष्णुनक्षत्रम् अर्थात् श्रवणनक्षत्रम्। एषु नक्षत्रेषु वस्तिविरेचनवेधाः क्रियाः शुभाः। शुभदिनेषु अर्थात् शुभग्रहाणां वासरेषु शुभतिथिषु लग्नगते चन्द्रे वस्तिविरेचनवेधाः शुभाः भवन्ति। तदुक्तं ज्योतिःसागरग्रन्थे यथा-

''चित्रायुगे विधियुगे मित्रयुगे लघुषु वारुणे विष्णौ।
वस्तिविरेचनवेधाः शुभदिनतिथिचन्द्रलग्नेषु॥''

शुभग्रह-अर्कवासरेषु वा मृदुक्षिप्रध्रुवसंज्ञकनक्षत्रेषु। शुभराशिविलग्नेषु।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शान्तिकपौष्टिककार्यं शुभं भवति। तदुक्तं दीपिकायाम् यथा-

शुभग्रह-अर्कवारेषु मृदुक्षिप्रध्रुवोडुषु ।
शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम्॥

अपि च रत्नमालायाम् - हिबुके अर्थात् चतुर्थे। चतुर्थस्थे रवौ। लग्ने गुरौ। रविवासरेषु धर्मक्रियाः शुभदाः भवन्ति। रवेर्दिने हिबुके अर्के। लग्ने गुरौ धर्मक्रियारम्भः करणेन शुभदः इति गदितम्। तच्च-

हिबुके अर्के गुरौ लग्ने धर्मारम्भो रवेर्दिने।

श्रुत्युक्ताः वेदोक्ताः यागाः पूर्वमीमांसाशास्त्रे वर्णिताः, मनस्मृतिः-गौतमस्मृति-पाराशरस्मृतिप्रभृतिग्रन्थेषु अष्टादशपुराणेषु अष्टादश-उपपुराणेषु इत्यादिषु प्रोक्तानां धार्मिकानुष्ठानाम् आचरणार्थं कालविशेषः वर्णितः अस्ति। गुरुबुधलग्ने वा बुधगुर्वोः षड्वर्गेषु धर्मारम्भो प्रारम्भः करणीयः। एतयोः बलवत्तरे सति अपि धर्मारम्भो कर्तुं शक्यम्। तच्च वर्णितं यथा-

''श्रुतिस्मृतिपुराणादिप्रोक्तानां धर्मकर्मणाम्।
गुरुज्ञलग्नवर्गेषु प्रारम्भस्तद् बले सति।''

गुरुज्ञलग्नवर्गेषु श्रुतिस्मृतिपुराणादीप्रोक्तानां धर्मकर्मणां तद्बले प्रारम्भः शुभदः भवति।

बोधप्रश्नाः

8. अगु शब्दस्यार्थः कः भवति?

9. रत्नमालाग्रन्थानुसारेण बीजवपनक्रियायाम् उत्कृष्टफलप्रदानि नक्षत्राणि कानि भवन्ति?

१०. वसिष्ठमहर्षेः अभिप्रायानुसारं बीजवपनक्रियायां शुभनक्षत्राणि कानि भवन्ति?

११. प्राचीनकाले कृषिकर्मणि केषु कार्येषु मुहूर्तं विचार्यते स्म?

१२. वस्तिविरेचनवेधक्रियार्थं शुभसमयं लिखत।

ग्रन्थस्य मूलपाठः-

क्षिप्रे मैत्रे वित्सितार्केज्यवारे सौम्ये लग्नेऽर्के कुजे वा खलाभे।
योनेर्मैत्र्यां राशिपश्चापि मैत्र्यां सेवा कार्या स्वामिनः सेवकेन॥२६॥

स्वात्यादित्यमृदुद्विदैवगुरुभे कर्णात्रयाश्वे चरे।
लग्ने धर्मसुताष्टशुद्धिसहिते द्रव्यप्रयोगे शुभः॥

नारे ग्राह्यमृणं तु सङ्क्रमदिने वृद्धौ करेऽर्केऽह्नि यत्।
तत् वंशेषु भवेदृणं न च बुधे देयं कदाचित् धनम्॥२७॥

मूलद्वीशमघाचरध्रुवमृदुक्षिप्रैर्विनार्कं शनिं।
पापैर्हीनबलैर्विधौ जललवे शुक्रे विधौ मांसले।
लग्ने देवगुरौ हलप्रवहणं शस्तम् न सिंहे घटे।
कर्काजैणघटे तनौ क्षयकरं रिक्तासु षष्ठ्यां तथा॥28॥

हस्ताश्विपुष्योत्तररोहिणीषु चित्रानुराधामृगरेवतीषु।
स्वातौ धनिष्ठासु मघासु मूलेबीजोत्परुत्कृष्टफलप्रदा प्रदिष्टा॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वाष्ट्रान्मित्रकभाद् द्वयेम्बुपलिघुश्रोत्रे शिरामोक्षणं।
भौमार्केज्यदिने विरेकवमनाद्यं स्याद् बुधार्की विना।।२९।।

मित्रक्षिप्रचरध्रुवे रविशुभाहे लग्नवर्गे विदो।।
जीवस्यापि तनौ गुरौ निगदिता धर्मक्रिया तद् बले।।30।।

७.८ सारांशः

स्वामिसेवाप्रारम्भार्थं सुसमयः कथितः वर्तते। तदित्थं क्षिप्रमैत्रनक्षत्रेषु सूर्यबुधगुरुशुक्रवासरेषु लग्नभावगतेषु सौम्यग्रहेषु राश्यधिपमैत्र्यां योनिमैत्र्यां सत्यां स्वामिसेवाप्रारम्भार्थं सुसमयः भवति। क्षिप्रसंज्ञकनक्षत्रेषु मैत्रसंज्ञकनक्षत्रेषु सूर्यबुधगुरुशुक्रवासरेषु अन्यतमेषु वासरेषु सौम्यग्रहाणां लग्ने स्थित्या रवौ कुजे वा दशमे एकादशभावे वा स्थिते सति योनिमैत्रीकूटे राश्यधिपमैत्रीकूटे सेवकेन स्वामिनः सेवाकार्यारम्भः कर्तुं योग्यसमयः भवति। स्वामिसेवायां वैविध्यम् वर्तते। यथा वेतनग्रहणादिसम्बन्धः गुरुशिष्यसम्बन्धः इत्यादयः भवन्ति। तत्र गुरुशिष्यादिसम्बन्धे मुहूर्तं लिख्यते। शुभलग्नगे दशमैकादशे सूर्ये कुजे वा विद्यायुधाभ्यासयुक्तसेवाकर्मापि सिद्ध्यति।

द्रव्यं परस्मै ऋणत्वेन दानप्रक्रिया एव द्रव्यप्रयोगः शब्देन आहूयते। ऋणरूपेण दानार्थं द्रव्यस्वीकरणार्थं च द्रव्यप्रयोगऋणग्रहणमुहूर्तविचारः अस्मिन् ग्रन्थे कथितः वर्तते। अश्विनी-पुनर्वसु-पुष्य-चित्रा-स्वाती-विशाखा-अनुराधा-मृगशीर्ष-श्रवण-धनिष्ठा-शतभिषा-रेवती इत्येतेषु द्वादशनक्षत्रेषु अन्यतमेषु दिने चरलग्नेषु मुहूर्तलग्नात् नवम-अष्टम-पञ्चमभावेषु भावशुद्धौ द्रव्यप्रयोगः शुभदः भवति। कुजवासरे रविवासरे सङ्क्रमदिने वृद्धियोगे हस्तनक्षत्रे ऋणं न स्वीकरणीयम्। बुधवासरे ऋणं न देयम्। बुधवासरे द्रव्यसङ्ग्रहणं करणीयम्। मेष-कर्क-सिंह-तुला-मकर-कुंभलग्नानि विहाय लग्नभावगते गुरुचन्द्रौ पापग्रहाणां बलहीनातायां रविशनिवासरौ विहाय रिक्तासंज्ञकतिथिषु षष्ट्यां चरमृदुध्रुवक्षिप्रनक्षत्रेषु शुभदः भवति।

मेषलग्ने पशून् हन्ति। कर्कटे जलजं भयम्। सिंहलग्ने सस्यभयं ज्ञेयं। तुलायां हलसङ्क्षयः। मकरे सस्यनाशः कुम्भे चौरभयं स्यात्। तिथिवशात् फलम् व्यरचयत् बलीवर्दात् अष्टमी हन्ति। नवमी सस्यघातिनी भवति। षष्ठी कीटजननी भवति। चतुर्दशी पशून् हन्ति। श्रवण-शतभिषज्-पुनर्वसु विशाखा इत्येषु नक्षत्रेषु मूल-मघा-ध्रुव (उत्तरात्रयरेहिण्यः)-मृदु (मृगान्त्यचित्रमित्रर्क्षम्)-क्षिप्र (हस्ताश्विपुष्याभिजितः)-धनिष्ठास्वातीषु बीजवपनं शुभम् भवति। अगुभतो अष्ट-त्रीणि-एकम्-त्रयम्-एकम्-त्रयम्-एकं त्रयम्-चत्वारि नक्षत्राणि एकान्तर क्रमेण अशुभानि सत् शुभकराणि च भवन्ति। चित्रा-स्वाती-अनुराधा-ज्येष्ठा-रोहिणी-मृगशिरानि-शतभिषज् -अश्विनी-पुष्य-हस्त-अभिजित्-श्रवणानि एषु नक्षत्रेषु तथा शिरामोक्षणं कर्तुं योग्यम्। मृगशिर-रेवती-चित्रा-अनुराधा-हस्ता-अश्व-पुष्य-अभिजित्-स्वाती-आदित्य-श्रवण-धनिष्ठा-शतभिषज् एषु नक्षत्रेषु चन्द्रबुधगुरुशुक्रवासरेषु धर्मक्रियार्थं शुभं भवति।

७.९ शब्दावली

१.	अगुः	=	गावः नाम किरणाः भवन्ति। यस्य किरणाभावाः सः इति अर्थे अगुः राहुः इति।
२.	उडुः	=	नक्षत्रम्।
३.	कासरः	=	महिषः।
४.	कुञ्जरः	=	गजः हस्ती।
५.	आर	=	कुजः वक्रः क्रूरदृक्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६.	हलप्रवाहः	=	हलेन कर्षणक्रिया हलप्रवाहशब्देन उच्यते।	'कृषिकर्मसम्बन्धिमुहूर्त्तः'
७.	वारिजोदये	=	जलोदये अर्थात् जलराशिषु उदये।	
८.	बीजोप्तौ फणिचक्रम्=		बीजोप्तौ राहुचक्रम्।	
९.	उट्टङ्कितम्	=	उल्लिखितम्।	
१०.	मिथः	=	परस्परम्।	
११.	अहिः	=	सर्पः।	
१२.	कुरङ्गः	=	हरिणः।	
१३.	श्वा	=	श्वानः शुनकः कुक्कुरः।	
१४.	उन्दुरुः	=	मूषकः।	
१५.	ऋणच्छेदः	=	ऋणस्य च्छेदः।	
१६.	मूर्ध्नि	=	शिरसि।	

७.१० सहायकग्रन्थाः

१. मुहूर्तचिन्तामणि श्री रामदैवज्ञविरचित पीयूषधारा संस्कृतटीका चौखम्बा सुरभारती प्रकाशन वाराणसी ३८ यू ए बंगलो रोड जवाहर् नगर् पि.न. २११३ दिल्ली ११०००७।

२. मुहूर्तचिन्तामणि श्री रामदैवज्ञविरचित पीयूषधारा संस्कृतटीका चौखम्बा सुरभारती प्रकाशन वाराणसी चौक् बैंक आफं बडोदा भवन के पीछे पोस्ट बाक्स नं १०६९ वारणसी २२१००१।

७.११ सन्दर्भग्रन्थाः

१. मुहूर्तचिन्तामणिः श्री रामदैवज्ञविरचित पीयूषधारा संस्कृतटीका चौखम्बा सुरभारती प्रकाशनम् वाराणसी ३८ यू ए बंगलो रोड् जवाहर् नगर् पि. न. २११३ दिल्ली ११०००७।

२. मुहूर्तदीपिका-महादेवभट्टविरचितः श्रीमन्महादेवकविविरचितया संस्कृतटीकाया समलङ्कृतः।

३. मुहूर्तसन्मार्गदर्श.नी-श्रीपर्याय पेजावरमठ उडुपि शिवल्लि ब्राह्मणसं. उडुपि।

४. मुहूर्तषट्पञ्चाशिका-श्रीविद्यानिकेतनम् संस्कृतग्रन्थावलिः श्रीविद्यानिकेतनम् श्रीकण्ठेश्वरम् तिरुवनन्तपुरम्।

७.१२ बोधप्रश्नोत्तराणि

१. क्षिप्रमैत्रनक्षत्रेषु। सूर्यबुधगुरुशुक्रवासरेषु। लग्नभावगतेषु सौम्यग्रहेषु। राश्यधिपमैत्र्यां। योनिमैत्र्यां। सत्यां तादनीं स्वामिसेवाप्रारम्भार्थं सुसमयः भवति।

२. एकयोनिषु जातानां मैत्री शुभदं भवति। भिन्नयोनिषु जातानां मध्यमफलं स्याद्। अरिभावे न मैत्री भवति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. स्वामिसेवकयोः जन्मराश्यधिपयोः मित्रत्वे भावीफलम् शुभं भविष्यति। अन्यथा चेत् अशुभमिति ज्ञेयम्। यथा जन्मराश्यधिपानां समत्वे भावीफलं सममिति ज्ञेयम्। जन्मराश्याधिपानां शत्रुत्वे भावीजीवने क्लेशेति चिन्त्यः।

४. द्रव्यं परस्मै ऋणत्वेन दानप्रक्रिया एव द्रव्यप्रयोगः शब्देन आहूयते।

५. चरे लग्ने अर्थात् मेषतुलामकराणाम् अन्यतमे लग्ने द्रव्यप्रयोगः शुभम् वर्तते।

६. अश्विनी-पुनर्वसु-पुष्य-चित्रा-स्वाती-विशाखा-अनुराधा-मृगशीर्ष-श्रवण-धनिष्ठा-शतभिषज्-रेवतीनक्षत्रेषु शुभदं भवति।

७. कुजवासरे। रविवासरे। सङ्क्रमदिने। वृद्धियोगे। हस्तनक्षत्रे। ऋणं न स्वीकरणीयम्। बुधवासरे ऋणं न देयम्। बुधवासरे सङ्ग्रहणं करणीयम्।

८. अगु शब्दस्यार्थः राहुः भवति।

९. हस्ता-अश्विनी-पुष्य-उत्तरा-त्रय-रोहिणी-चित्रा-अनुराधा-मृगशिर-रेवती-स्वाती-धनिष्ठा-मघा-मूला इत्येतेषु नक्षत्रेषु बीजवपनक्रियाया उत्कृष्टफलप्रदा भवति।

१०. धातृद्वये अर्थात् रोहिणी मृगशिरा। कौणप पितृनक्षत्रं मघा। पुष्ये। हस्तत्रये अर्थात् हस्ता। चित्रा। स्वाती। मूला एभिः नक्षत्रे कृते बीजवपनं शुभं भवति।

११. प्राचीनकाले हलप्रवहणे बीजवपने धान्यवृद्धौ धान्यच्छेदने इत्यादिषु कार्येषु मुहूर्तं विचार्यन्ते स्म।

१२. शुभदिनेषु अर्थात् शुभग्रहाणां वासरेषु शुभतिथिषु लग्नगते चन्द्रे चित्रायुगे विधियुगे मित्रयुगे वारुणे विष्णौ लघुषु वस्तिविरेचनं शुभदं भवति।

७.१३ अभ्यासप्रश्नाः

१. अन्यमुहूर्तग्रन्थानां नामानि लिखत।

२. आधुनिककाले सेवकस्य स्वामिसेवायां मुहूर्तविचारस्य औपयोगिता अथवा औचित्यं विचार्यता।

३. अमुस्मिन् समये नूतन आजीविकायाः स्वामिसेवायाः मुहूर्तविचारं विशदयत।

४. भारतीय कृषिसम्बन्धित ग्रान्थानां नामानि लिखत।

५. हलप्रवहणयोग्यशुभतिथयः के?

६. हलप्रवहणयोग्यशुभनक्षत्राणि कानि?

७. हलप्रवहणयोग्यशुभवासरः के?

८. लग्नशुद्धिं विशदयत।

९. हलचक्रम् लेखन भेदान् लिखत।

१०. बीजोप्तौ फणिचक्रम् विशदयत।

११. ज्योतिःसारसागर ग्रन्थानुसारं कृषिक्रियायां मुहूर्तं व्यशदयत।

१२. नक्षत्राणां संज्ञानि लेख्यानि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनदृशा संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।

Kirtikant Sharma Collection, Najafgarh